atan, al:
'Mahabhasya madiprodyotah

PK
531
A15
1899
v.1
pt.2



UNIVERSITY OF TORONTO
LIBRARY

WILLIAM H. DONNER
COLLECTION

purchased from
a gift by

THE DONNER CANADIAN
FOUNDATION

BIBLIOTHECA INDICA:


A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 948.



महाभाष्यप्रदीपोद्योतः ।

MAHĀBHĀṢYAPRADĪPODYOTA

BY

NĀGEÇA BHAṬṬA

EDITED BY

PAṆḌIT BAHUVALLABHA ÇĀSTRI.

VOL. I, FASCICULUS II.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET,

1899.

PK 55 .A5 1899 v.1 pt.2

LIBRARY

MAR 19 1980

UNIVERSITY OF TORONTO

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL,

No. 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MESSRS. LUZAC & CO.,

46, GREAT RUSSELL STREET, LONDON, W. C., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

Advaita Brahma Siddhi, (Text) Fasc. 1–4 @ /6/ each ...	Rs.	1	8
*Agni Purāṇa, (Text) Fasc. 4–14 @ /6/ each		4	2
Aitarēya Āraṇyaka of the Rg Vēda, (Text) Fasc. 1–5 @ /6/ each ...		1	14
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1–5 and Vol. II, Fasc. 1–5 Vol. III, Fasc. 1–5 Vol. IV, Fasc. 1–5 @ /6/		7	8
Aṇu Bhāṣyam, (Text) Fasc. 1–5 @ /6/ each		1	14
Aphorisms of Sāṇḍilya, (English) Fasc. 1		0	12
Aṣṭasāhasrikā Prajñāpāramitā, (Text) Fasc. 1–6 @ /6/ each ...		2	4
Açvavaidyaka, (Text) Fasc. 1–5 @ /6/ each		1	14
Avadāna Kalpalatā. (Sans. and Tibetan) Vol. I, Fasc. 1–5; Vol. II, Fasc. 1–5 @ 1/ each		10	0
*Bhāmatī, (Text) Fasc. 4–8 @ /6/ each		1	14
Bhāṭṭa Dīpikā Vol. I, Fasc. 1		0	6
Brahma Sūtra, (English) Fasc. 1		0	12
Bṛhaddēvatā (Text) Fasc. 1–4 @ /6/ each		1	8
Bṛhaddharma Purāṇa, (Text) Fasc. 1–6 @ /6/ each		2	4
*Caturvarga Chintāmaṇi (Text) Vols. II, 1–25; III. Part I, Fasc. 1–18. Part II, Fasc. 1–10 @ /6/ each		19	14
*Çrauta Sūtra of Āpastamba, (Text) Fasc. 3–14 @ /6/ each ...		4	8
Ditto Āçvalayana (Text) Fasc. 1 to 11 @ /6/ ...		4	2
* Ditto Lāṭyāyāna, (Text) Fasc. 1–9 @ /6/ each		3	6
Ditto Çānkhāyana, (Text) Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–4, Vol. III, Fasc. 1–4 @ /6/ each		5	10
Çrī Bhāshyam, (Text) Fasc. 1–3 @ /6/ each		1	2
Kāla Mādhava, (Text) Fasc. 1–4 @ /6/ each		1	8
Kāla Viveka, Fasc. 1 to 3		1	2
Kātantra, (Text) Fasc. 1–6 @ /12/ each		4	8
Kathā Sarit Sāgara, (English) Fasc. 1–14 @ /12/ each		10	8
Kūrma Purāṇa, (Text) Fasc. 1–9 @ /6/ each		3	6
Lalita-Vistara, (English) Fasc. 1–3 @ /12/ each		2	4
Madana Pārijāta, (Text) Fasc. 1–11 @ /6/ each...		4	2
Manuṭīkā Saṃgraha, (Text) Fasc. 1–3 @ /6/ each		1	2
*Mārkaṇḍēya Purāṇa, (Text) Fasc. 4–7 @ /6/ each		1	8
Mārkaṇḍēya Purāṇa, (English) Fasc. 1–5 @ /12/ each		3	12
*Mīmāṁsā Darçana, (Text) Fasc. 7–19 @ /6/ each		4	14
Nārada Smṛti, (Text) Fasc. 1–3 @ /6/		1	2
Nyāyavārtika, (Text) Fasc. 1–4 @ /6/		1	8
*Nirukta, (Text) Vol. III, Fasc. 1–6; Vol. IV, Fasc. 1–8 @ /6/ each...		5	4

गतार्थत्वादिति। तथा च तद्वदत्रापि लक्षणेति भावः॥ चतुर्थहेतुमाह भाष्ये **संघातार्थवत्त्वाच्चेति**। **एका सिकतेति** भाष्यप्रयोगादेव सिकताशब्दस्यैकवचनान्तत्वमपि॥ **तदन्तर्गतत्वादिति**। इदं चिन्त्यम्। [१]**इत्थं भूतलक्षणे** इति सूत्रस्वग्रन्थविरोधात्॥ तत्र हि संज्ञाप्रवृत्त्युत्तरकालजातविभक्तेस्तन्मध्यपतितत्वेऽपि तदवयवत्वं नेत्युक्तम्। तस्मादन्तरङ्गत्वादवयवप्रातिपदिकत्वे तन्निमित्तसुपि तदनन्तरं कृदन्तत्वनिमित्तकप्रातिपदिकत्वे सुब्लोप[२] इति वक्तुं युक्तम्। धनतीत्यादौ तु न तदापत्तिः। धातुप्रत्ययान्तपदयोस्तदवयवपरत्वेन तत्र तदप्राप्तेः। धात्वादेस्तदवयवत्वं तु व्यपदेशिवद्भावेन बोध्यम्। वस्तुत **इत्थम्भूतेति** सूत्रस्थकैयटोक्तिरयुक्तेति तत्रैव निरूपयिष्याम इति न दोषः। धकारे जश्त्वमादिपदार्थः। **सुबन्तावयवसमुदायस्येति**। सुबन्तावयवेति बहुव्रीहिस्ततः कर्मधारयः। इदमुपलक्षणभेदे सति यदर्थयोः संसर्गस्तद्द्वारकार्थवत्समुदायस्य। तेन तिङन्तसमुदायस्य व्यावृत्तिः। प्रकृते न भेद इत्याह[३] **येनैव चेति**॥

तच्चैकमिति। **संघातस्यैकत्वमिति** भाष्यस्य संघातस्याप्येकत्वमर्थः। एवञ्च विभक्तिः समुदायादेवेति भावः॥ ननु समुदायादुत्पद्यमाना विभक्तिः सर्ववर्णसंबन्धिनी चेत्प्रतिवर्णं पदत्वं प्राप्नोतीत्यत आह[४] **पदसंज्ञात्विति**। यतश्चार्थबोधनाय विभक्त्युत्पत्तिः तस्य संज्ञाप्रवर्त्तते न लेषामिति भावः। केचित्तु विभक्तिः प्रकृत्यर्थ-

---

१ अ २। पा ३। सू २१॥ २ सुब्लोपः॥ क॥
३ इत्यत आह॥ क॥ ४ प्राप्नोत्यत आह॥ क॥

गतप्रकृतिबोध्यसंख्याद्योतिका। संख्या च समुदायस्यैवार्थो न प्रत्येकवर्णानामिति न तेभ्यः स्वादुत्पत्तिः। एकत्वं संघातस्यार्थ इति भाष्यस्वरसात्। प्रकृत्यंशे वर्णव्यत्ययापायथोः संख्यान्तरानुपजनात्सा समुदायस्यैवार्थ इति तद्भावः॥ न चाव्ययेभ्य इवैकवचनं दुर्वारम्। संख्यारहितार्थप्रतिपादकेषु तथा स्वीकारेऽपि वस्तुतः संख्यावत्यर्थे संख्यानभिधायकस्वाद्युत्पत्तौ नानाभावात्। एवञ्चैषां प्रकृतित्वमेव नेति न केवला प्रकृतिरित्यस्यापि न विषयः। एतेन प्रत्येकं पदसंज्ञानुग्रहाय द्विर्वचनवैषम्यात्स्वादेव प्रत्येकं सुदुत्पत्तिरित्यपास्तमित्याहुः॥

अनुमानेन साधितामर्थवत्तां प्रत्यक्षविरोधेन दूषयति। **अनर्थकास्त्विति**। सर्ववर्णानां पक्षे हेतोर्भागासिद्धत्वं स्यादत **आह धात्वादीति**॥ विपक्षे बाधकमाह **अन्यथेति**। वर्णव्यत्ययेत्यादिहेतोरर्थानुपलब्धेरिति हेतोश्च धात्वादितिरिक्तवर्णविषयत्वे एव संगतेरित्यपि बोध्यम्॥ **असमासाशङ्केति**। तथा च वीप्सा न प्रतीयेतेति भावः॥ **तेनैवेति**। वीप्सायां तस्य विधानादिति भावः॥ ननु वर्णव्यत्यादिष्वर्थदर्शनं नार्थवत्त्वाभावसाधकमत **आह यदुक्तमिति**॥ एवञ्चार्थवत्त्वसाधकहेतौ व्यभिचारप्रदर्शनाद्वा[१] [२]अनर्थकतासाधकत्वमस्य। भाष्ये **अर्थदर्शनादित्यस्य** वर्णव्यत्यायाद्यभावे योऽर्थस्तस्यैव दर्शनादित्यर्थः॥

नार्थव्यत्यय इत्यस्य नार्थान्तरावगतिः किन्तु [३]तस्यैवावग-

---

१ प्रदर्शनद्वारा। ख। ङ॥ २ अनर्थकसाधकत्वम्॥ क॥
३ तस्यैव गतिः॥ क॥

तिरित्यर्थः॥ उभयत्र न्याय्यत्वं विषयभेदेनेत्याह **यत्रान्वयेति**। यथा एति इतः दत्यादौ न सर्वत्र कूपादावित्यर्थः॥ **न कूपस्तूपेति**। वर्णानामर्थवत्त्वे ऊपशब्दस्य चित्रन्वयादर्थान्वयः स्यात्। न च दृश्यते। ततः समुदायान्तरत्वप्रयुक्तमेवार्थान्तरत्वं तदर्थानवगतिश्च न तु व्यत्ययादिकृतमित्यर्थः॥

ननु ककारसकारयकाराणामेवार्थवत्त्वमुपस्तु प्रत्युद्बोधक एवेति कस्यार्थस्य सत्ता तत्र तत्रापाद्यत इति चेत् तर्हि भग्नमेव वर्णानामर्थवत्त्वं तत्रैव पदे। ऊपयोरर्थाभावात्। किञ्च संख्यासमुदायस्यैवार्थ इत्यपि नियन्तुमशक्यम्। कूपगतैकत्वस्य यूपादिभिरप्रतीत्या संख्यापि कादिभिरन्वयव्यतिरेकसत्त्वात्। द्विर्वचनेन वैषम्यं तु प्रागुक्तमेव। तस्मात्समुदायस्यैवार्थवत्त्वं तदेव ध्वनयन्नाह भाष्ये **इदं खल्वपीत्यादि॥ दृष्टा हीति**। अतदर्थेन रथाङ्गेन गुणिनो रथस्य यथार्थवत्ता तथा प्रकृतेऽपीति भावः॥

भाष्ये **अज्ग्रहणेष्विति**। प्रत्याहारे अक्षरसमाम्नायेऽज्ग्रहणेषु अच् प्रत्याहारग्राहकेषु पठितानामनुबन्धानां प्रत्यासत्त्याऽनुग्रहणं कुतो नेत्यर्थः॥ तत्[1]फलितार्थमाह **य एते इति॥ अनु**! तद्बोधकसूत्रेषु प्रागुक्तेषु॥ **प्रत्याहारार्थाः**। तदुपकारकाः॥ [2]**अज्ग्रहणेन**। अच्शब्देन। अणादिप्रत्याहारेषु तेषां ग्रहणे फलाभाव मनसि निधायाज्ग्रहणेनेत्युक्तम्। न च हशादौ टग्रहणस्यापत्तिः। हल्षूच्चारणार्थाकारोच्चारणेनोच्चारणार्थवर्णहीन[3]हलां हल्घटिते प्रत्या-

१ फलितमाह॥ क॥ २ उपलब्धभाष्यपुस्तके "अज्ग्रहणेषु" इत्यस्ति॥
३ हलोहल्घटिते। क। ख।

हारे ग्रहणाभावस्य वक्तुं शक्यत्वात् ॥ **प्राधान्येन**। प्रत्याहारेषु ग्रहणार्थत्वेन॥ **परार्थेति**। अजादिस्वरूपबोधनार्थत्वेन परार्थत्वम्। यथाऽकारादयः संज्ञिविशेषसमर्पणायोपात्ता न तथाऽणादयः इत्यर्थः ॥ [१]अप्रधानत्वमप्याचार्याचारेण साधयति भाष्ये **आचार्यस्येति**। आचार्यशब्देनानादिः [२]शब्दपुरुषः। एवञ्चान्यत्र संज्ञिविशेषसमर्पणायोपात्तत्वादितामसंज्ञित्वमेवेति भावः ॥ **परत्वादित्यादन्तरङ्गत्वोपलक्षणम्**। एवञ्च पूर्वमनुबन्धलोपाद्**दादिरन्त्येनेति** संज्ञाविधानकालेऽसन्निधानादित्यन्वयः। एवञ्चानुबन्धसदृशभिन्नानामेव मध्यगसदृशानां ग्राह्यतां बोधयतीति भावः ॥

भाष्ये **लोपः खल्वपि तावदिति**। सर्वतः प्रथममित्यर्थः। यत्तु एवमपि लणित्यकारस्य हल्षु ग्रहणापत्तेराचारादित्येव समाधिरत्र युक्त इति। तन्न। [३]**अतो ल्रान्तस्येति** सूत्रे लकारोच्चारणेन **लण्**सूत्रस्थस्यानुनासिकत्वाभावज्ञापनात्। एवञ्च तस्यानुबन्धत्वमेव न किन्तूच्चारणार्थत्वमेव। अत एव भाष्ये **अइउणित्यादिसूत्रचतुष्टयोपादानेनैवैतद्विचारप्रवृत्तिः** कृता। श्लोके च **अज्ग्रहणेष्वित्येवोक्तम्** ॥ [४]**उरण्रपरसूत्रे च लपरत्वस्योपसंख्यानमेव कार्यमिति तुल्यास्य**[५] सूत्रे वक्ष्यते ॥ भाष्ये **तत्कालानामचां ग्रहणमच्** पदेन यथा स्यादिति योगविभागः कार्य इत्यन्वयः। **सिडेऽच्त्वे इति**। अकारादीनामुपदेशात्स्वर्णग्रहणाच्चेति भावः ॥

---

१ अप्रधानम् ॥ अप्रधानत्वस्य ॥ ख ॥ २ शब्दपुरुष एव ॥ क ॥
३ अ ७ । पा २ । सू २ ॥ ४ अ १ । पा १ । सू ५१ ॥
५ अ १ । पा १ । सू ९ ॥

ननु ककारद्वयस्य मात्रिकवर्णत्वं कथमेकस्यैव चल्लगित्यत्रोपदेशादत आह **ककाराकृतेरिति॥ न च वर्णद्वयेनेति।** जातिरपि स्वपर्याप्त्यधिकरणव्यक्त्यैव [1]तद्वारैव च कार्यभागिति भावः॥ भाष्ये **एष एवार्थ इति। अपर आहेत्यादिना** वार्त्तिककृतोक्त इत्यर्थः॥ **ह्रस्वादीनामिति। ह्रस्वदीर्घप्लुत** इत्यतः प्राग्यावद् **ऊकालोजिति** तावदेवास्तु पृथक्सूत्रम्। फलं दर्शयति अज्निमित्तकार्याणि तत्कालेष्वेव कर्त्तुमर्हाणि यथास्युरित्यन्वयः॥

अणः सुष्ठूपदेशः अण्सूपदेशः। अण्शब्दोच्चारणं [2]तदन्तस्थानां बोधकम् अणुदित्यत्र किमर्थं क्रियते इत्यर्थो [3]भाष्यस्येत्यत आह **अजुदिदिति॥ अण्सु** अण्मध्ये तेनात्र स्थाने किमर्थं उपदेशः इति तु नार्थ इत्याह **इण्ग्रहणेनेति।** इह मँय्यन्तेत्यादिभाष्यं गुणा भेदका इति पक्षे। भेदकत्वपक्षे[4] इदमेवाण्ग्रहणं मानमिति भावः। यथास्थितसूत्रन्यासे इदम्। जातिपक्षेणाण्ग्रहणप्रत्याख्याने तु न कश्चिदिचारः। एवं **गुणा अभेदका इति** न्याय्यपक्षेऽपि न विचार इति बोध्यम्॥ भाष्ये **वक्ष्यत्येतदिति।** सिद्धत्ववचनञ्चावश्यकम्। अन्यथा परस्यानुस्वारस्य **वा[5] पदान्तस्येति** परसवर्णे तस्यासिद्धत्वात् पूर्वस्य **अनुस्वारस्य**

---

१ तद्वारैव कार्यभाग्॥ क॥ इ॥ २ तदन्तः स्थानाम्। सम्॥
३ भाष्यस्येत्याह॥ क॥ ४ पक्षे चेदम्॥ क॥
५ अ ८। पा ४। सू ५८॥

यथीत्यस्यानापत्तौ रूपासिध्यापत्तेः। तर्हि द्विर्वचनसिद्धिरेव फलमित्याह **परसवर्णे तर्हीति॥**

ननु न भेदोऽनुपलब्धेरत आह **श्रुतिकृत इति॥ यदि नित्यो लोपः स्यादिति।** तदा भेदो न स्यादित्यर्थः॥ **विभाषा चेति।** चस्वर्थे॥ एकदेश्याह **यथाऽभेद इति। यथा** द्विर्वचनप्रवृत्त्यप्रवृत्त्योर्भेदो न भवति। तथेवास्तु [1]मानुवृत्तद्विर्भाषाग्रहणमिति भावः॥ तृतीयो ज्ञापकमुपन्यस्यति **अनुवर्त्तत इत्यादिना।** [2]**झरो झरीति लोपे** इत्यर्थः। मध्यस्थतया [3]**हलोयमामि**त्यस्यापि वैकल्पिकत्वं सिद्धमिति भावः॥ **लोपापवाद इति।** यद्यपि हर्यनुभव इत्यादौ तदुदाहरणे लोपेऽप्राप्तेऽपि द्विर्वचनमारभ्यते[4]। तथापि कृते द्विर्वे [5]पश्चाल्लोपेऽपि द्विर्वचनं व्यर्थमित्याशयेनापवादत्वोक्तिरिति भावः॥ **तयोर्योगयोः।** लोपविधायकयोः॥ **प्रक्तमित्यादौ** दाधातोः **क्तेः आतश्चोपसर्गादित्यनेन** [6]**॥ आदित्ये** आदित्याङ्ग्वाद्यर्थण्यान्ताद् [7]**ण्यः। तद्व्याचष्टे ज्ञापकत्वमस्य विघटयतीति।** सर्वथाऽसम्भवीत्युपसंहरतीत्यर्थः। ज्ञापकेन तदनुवृत्तिं साधयतः तत्खण्डनेऽनुवृत्तिः सन्दिग्धैवेति भावः॥ **लण् सूत्रे विभाषा स लोप**

---

१ मास्तु तद्वृधिभाषाग्रहणम्॥ ख॥ २ अ ८। पा ४। सू ६५॥
३ अ ८। पा ४। सू ६४॥ ४ आरभते॥ क॥
५ पश्चाल्लोपे॥ क॥
६ अच उपसर्गात्तः। अ ७। पा ४। सू ४७॥
७ ण्ए प्रत्ययः॥ क॥

दत्युक्तेराह **आचार्येति**। [1]अण्ग्रहणात्तु ज्ञापकादित्यपि कश्चित्। तत्तु वार्त्तिककृताऽण्ग्रहणप्रत्याख्यानान्नोक्तम्॥

लण्॥ ६॥ किमिति। क्व प्रत्यासत्तिः क्व व्याप्तिरिति सन्देह इत्यर्थः॥ भाष्ये **कतमस्मिन्निति**। वक्ष्यमाणरीत्या सर्वत्र निर्णायकसत्त्वात्प्रश्नः॥ कतरस्मिन्निति [2]पाठेऽपि उतरादिविधौ उपाधिप्रत्याख्यानान्न दोष इति बोध्यम्॥ **न हि द्वेर्लोप इति**। [3]वर्द्धेत्यादौ गुणोऽसिद्ध इति भावः॥ **दीर्घोऽच इत्येवेति**। मात्रालाघवाभावेऽपि सङ्ख्यालाघवायासन्देहाय चेति भावः॥

तथा गीष्केति। विसर्गस्यासिद्धत्वादिति भावः॥ **तेषु च कृतेष्विति**। परत्वादिति भावः॥ योगविभागस्य भाष्यानारूढत्वाद् **गोकेत्यादि** भाष्यात् **के परे** इति भाष्याच्च तेषामनभिधानं वक्तुं युक्तम्॥ भाष्ये **अचो हीति**। [5]**अचश्चेति** परिभाषणादिति भावः॥ **न हि पदान्ता इति**। पदानालेवानुनासिकोऽवसाने जायते इत्यास्त्येवेदमुक्तम्। न तु तत्र पदान्ताधिकारोऽस्ति॥ **लोप इति**। अण्ग्रहणे लो विशेषणादिति भावः॥ **पर्युदासेनेति**। क्रियमाणेऽण्ग्रहणे इत्यर्थः। भाष्येऽपि न सत्त्वं निषिध्यते किन्तु कार्यित्वमेवेत्याह **कार्यभाज इति**॥ एवञ्चानुनासिकप्राप्तियोग्याः पदान्ता न सन्तीत्यर्थः॥ वस्तुतोऽस्या अग्रे सिद्धान्तयुक्तिलेन तदज्ञानेनैव पूर्वपक्षस्यौचित्येनैवं भाष्यव्या-

---

१ अणग्रहणाज्ज्ञापकात्॥ क॥ ख॥ ङ॥ २ पाठे॥ क॥
३ गर्द्धेत्यादौ। ग॥
४ अत्र भाष्यम्॥ नहि के परेऽणः सन्ति। ननु चायमस्ति गोकानौकेति॥ ५ अ १। पा २। सू २८॥

ख्यानमनुचितम्। [1]पूर्वपक्षस्य सन्देहस्य चानुत्थानात्। तस्माद्दृष्टमाध्यायस्यं भाष्यमेकदेशयुक्तिरित्येवोचितम्। व्याख्यातञ्च तत्रोपाध्यायैरित्यमेव॥ भाष्ये **कर्तृ हर्तृ इति**। अत्रामुपलक्षणम्। अत **एवाचोऽप्रगृह्यस्येत्युक्तमन्यथा** कोऽप्रगृह्यस्येति वदेत्॥

निषेधात्सम्प्रसारणप्रसङ्ग इति। चिन्त्यमिदम्। णौ परतस्तत्प्रकृतिभूतप्रातिपदिकस्य टिलोप विधानेन [2]वृश्चतः स्थानिवे मानाभावेन वकारे "एकदेशविकृतन्यायेन" वृश्चतित्वस्य दुर्लभत्वात्। अर्द्धाधिकविकारेण प्रत्यभिज्ञाऽभावाच्च। अत एव राजकीयमित्यादौ अल्लोपो न। वृश्च एव टिलोप स्थानिवे तु प्रकृतिभावापत्तिः। एतेन विचि "एकदेशविकृतन्यायेन" वृश्चतित्वात् षत्वापत्तिः। न च णिलोपस्य स्थानिवत्त्वान्न षत्वम्। "पूर्वत्रासिद्धीये तन्निषेधाद्" इति परास्तम्। न च [3]**व्रश्चेति** [4]**सूत्रे** पदाधिकारेण व्रश्चान्तत्वमेकदेशविकृतन्यायेन सुलभमिति वाच्यम्। **स्कोरिति** सूत्रादन्ते ग्रहणमनुवर्त्य वैयधिकरण्येनैवान्वयाऽऽश्रयणेनादोषात्। अत एवान्ते ग्रहणं चरितार्थम् अर्द्धाधिकविकाराच्च[5]। एवञ्च वृक्षभञ्जो णिजन्तात् क्विपि वृक्षभ् [6]इत्यादौ षत्वं नेत्याहुः॥ **वलोपप्रसङ्गश्चेति**। इदमुपलक्षणम्।

---

१ पूर्वपक्षेऽस्य सन्देहस्य॥ इ॥

२ वृश्चतेः॥ क॥ इ॥ वृश्चतेः स्थानिवत्त्वे। ख॥

३ अ ८। पा २। सू ३६॥

४ सूत्र पदाधिकारेण व्रश्चान्तमेक - -। सम्॥

५ अधिकविकाराच्च॥ क॥

६ इत्यादि। सम्॥

कौ विधौ स्थानिवत्त्वनिषेधादूठ्प्रसङ्गस्येत्यपि बोध्यम्॥ भाष्ये [१]**रो रीति।** त्रिपाद्यां बहिरङ्गासिद्धत्वाभावादिति भावः। भष्भावः। [२]**एकाचो वश्** इत्यनेन। तत्र ह्येकाच इति झषन्तस्येति च धातोरित्यपेक्षया व्यधिकरणषष्ठीति भावः। रुत्वम्। [३]**दश्येत्यनेन।** भाष्ये **इहापि तर्हीत्यस्य** ऋत [४]इत्वमिति शेषः॥

ननु धातुग्रहणेन ऋकारस्य दीर्घो न रपर इति ज्ञापना-[५]**दज्झनेति** दीर्घस्याप्यरपरत्वात्[६] कथमचेत्त्वप्राप्तिरत आह **धातुग्रहणेनेति॥** भाष्ये **तस्मात्तचेति। न च इह किञ्चित् चपो** इति न्यायेन ज्ञापकत्वमप्यस्तिति वाच्यम्। गृदृत्यादेरनुकरणे "प्रकृतिवदनुकरणमि"त्यस्याभावे [७]**ग्रोयङी**त्यादावित्त्वाभावार्थम् इहापि तदावश्यकत्वाद् गत्यन्तराभावे एव तन्न्यायेन ज्ञापकत्वाश्रयणाच्च। तदाह **तस्मादिति।** एवञ्च रपरत्वेऽपि मातृणामित्यादौ [८]**उपधायाश्चेती**त्ववारणेन धातुग्रहणस्य चारितार्थ्येन रपरत्वनिवृत्तौ न ज्ञापकतेत्यर्थः॥ भाष्ये **सामर्थ्यात् पूर्वेणेति॥** न च गत्वेत्यादौ यणादेशे लपरत्वार्थमेव परेणाण्ग्रहणं स्यादिति सामर्थ्यं कथम्। ऋकारांशे हल्रूपाऽपि **रो रीति** प्रवृत्त्या फलाभा-

---

१ अ ८। पा ३। सू १४॥ २ अ ८। पा २। सू ३७॥
३ अ ८। पा २। सू ७५॥ ४ ऋत इत्वम्। क। ख। इ। ग॥
५ अ ६। पा ४। सू १६॥ ६ रपरत्वाभावात् कथमचेत्त्वाप्राप्तिः॥क॥
७ अ ८। पा २। सू २०॥ ८ अ ७। पा १। सू १०१॥

वेन तत्साहचर्याद् ऌकारांशेऽपि हल्रूपाऽणि अप्रवृत्तिरित्याश्रयात्। रलयोः समानश्रुतित्वेन तत्रापि **रो रीत्यस्य** प्रवृत्तेरित्यन्ये। ऌकारे यण्घटितप्रयोगानभिधानमेवैतद्ग्राह्यप्रामाण्यादित्यन्ये।

भाष्ये **सवर्णेऽण् तपरमिति**। यद् [1]**उर्ऋलृसूत्रे** तपरं करोति तज्ज्ञापकं सवर्णेऽण्ग्रहणं परणकारकमिति वार्त्तिकाचरार्थः॥ **इत्येवमर्थमिति**। ह्रस्वो यथा स्याद्दीर्घो माभूदित्येवमित्यर्थः॥ **ऋकार इति॥** [2]उद्देश्यसमर्थक इत्यर्थः॥ न च भाव्यमानत्वेन सवर्णग्रहणाप्रसक्तेस्तद्वैयर्थ्यम्। तपरत्वाभावे आदेशान्तरनिवृत्त्यर्थत्वेन स्वरूपाभ्यनुज्ञानार्थत्वेनापूर्वबोध्यत्वाभावेन चाविधेयत्वात्[3]। कृते तु तपरत्वे भाव्यमानतापीत्यन्यत्॥ भाष्ये **संमृद्येति**। आदेशेन तौ निवर्त्त्येत्यर्थः॥ अर्द्धचतुर्था इति वक्तुमुचितमत आह **अर्द्धेनेति॥** भाष्ये **तिस्रो मात्रा इति**। दण इति पदच्छेदाभिप्रायेणेदम्। तदुक्तं **विभक्तिनिर्देशे इति**। संहितायां तु सार्द्धमात्राद्वयमेवेति बोध्यम्। अणादिग्रहणेषूक्तैर्महद्भिर्यत्नैः सन्देहपरिहारे प्रतिपत्तिगौरवमिति लाघवाय वर्णान्तरमेव किं नानुबध्नत इत्याशयेनाह भाष्ये **किं पुनरिति॥ एतत्**। वक्ष्यमाणम्॥ **आचार्यः** शिवः॥

ननु ज्ञापितेऽपि [4]प्रवर्त्तकतया निवर्त्तकतया वा नास्य चारिता-

---

१ अ ७। पा ४। सू ७॥ २ उद्देश्यसमर्पकः॥ क॥ ख॥ ङ॥
३ चाभिधेयत्वात्॥ क॥ ४ प्रवर्त्तकनिवर्त्तकतया वा॥ क॥

र्थमत आह **न्यायादिति**। उक्तो न्यायः। आगमउपदेशपरम्परा तत्सिद्ध एवायमर्थो णकारानुबन्धनरूपस्वव्यवहारेण बोध्यत इत्यर्थः। एवञ्च व्याख्यानेनैव [1]पूर्वणकारेण केचित्परणकारेणेति निर्णये ज्ञापकानुसरणक्लेशो दृष्येति सूचितम्॥

अमङ्णनम्॥ ७॥ झभञ्॥ ८॥ भाष्ये **न झकारेत्यादि**। अञ्झहितहल्त्वाच्चानुकरणम्। सूत्रादन्यत्र नास्तीति **हयवरट्** सूत्रे प्रपञ्चितम्। **झकारभकारयोरपि हि पदान्तयोरिति**। पदान्तयोस्तयोः सतोस्ततः परस्याजादेः पदस्य झभौ स्यातामित्यर्थः॥ **एवमपि पञ्चागमा इति**। लक्ष्यसंस्कारकालिकं सञ्ज्ञासाम्यं यथासञ्ज्ञप्रवृत्तौ निमित्तमिति मन्यते। सिद्धान्ती तु प्रतिपत्तिकालिकमेव सञ्ज्ञासाम्यं तत्प्रवृत्तौ निमित्तमित्याह **सन्विति**॥ येषामागमानामागमिनः सन्ति तेषां भवन्तु इत्यर्थः। अनुदेशः प्रतिनिर्देशः। भगवता तु स्पष्टप्रतिपत्तयेऽनुबन्धद्वयमदर्शि॥

इति व्यवहारादिति। अइउण्सूत्रेऽयं व्यवहारो भाष्ये। **प्रश्न इति**। तद्घटकीभूताक्षरपदार्थावगमायेति भावः। भाष्ये-ऽक्षरमित्यस्य **नक्षरमिति** विग्रहप्रदर्शनम्॥ **तच्चेति**। अक्षरत्वेत्यर्थः। ब्रह्मतत्त्वस्यैव तत्त्वे हेतुं गर्भं विशेषणमाह **परमार्थतो नित्यमिति**। यतस्तदागमाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वरूपनित्यत्ववदित्यर्थः॥ नन्वेवं प्रकृते किमायातमत आह

---

१ पूर्वणकारेण केचित् केचित्परणकारेणेति॥ क॥ ख। इ। ग॥

व्यवहारनित्यतया चेति ॥ सर्वेषां [१]शब्दानामाकाशवत्सृष्ट्यादावुत्पत्तिः प्रलये च नाश इत्यर्थः ॥ एवञ्च व्यवहारनित्यतयाऽक्षरब्रह्मादृश्यवतां तेषां पदादिरूपाणामयं वर्णसमाम्नायः। शास्त्रप्रवृत्तिद्वाराबोधक इत्यक्षरसमाम्नाय इति चतुर्दशसूत्रीविषयव्यवहारोपपत्तिः। एवञ्च शब्दे औपचारिकोऽक्षरपदप्रयोग इति भावः। न्यायादिनयेऽप्याह **जातिस्फोटस्य वेति** ॥ भाष्येऽश्नोतेर्वेति। तद्व्याचष्टे **अर्थमश्नुत** इति। वर्णानामनर्थकत्वेन चिन्त्यमिदम्। नानादेशेषु युगपदेकस्यैव शब्दस्याभिव्यक्तिदर्शनेन स्फोटस्यापि व्यापकत्वमिति भाष्यार्थ इत्यन्ये ॥

ननु न्यायादिनयेऽव्याप्यवृत्तिषु विनाशिषु वर्णेषु कथं तद्व्यवहारोऽत आह **वर्ण वाऽऽहुरिति** ॥ च घटितः पाठोऽत्र प्रामादिकः। व्याख्यानभाष्येऽथवेत्युक्तेः ॥ नन्वनन्तरोक्तयोगाभावात्कथं तेषु प्रयोगोऽत आह **रूढिरिति**। तदुक्तं भाष्येऽक्षरमिति संज्ञेति ॥ **व्याकरणान्तरे** इति। पूर्वसूत्रशब्दे षष्ठीतत्पुरुष इति भावः ॥ एवञ्चाक्षरसमाम्नाय [२]इत्यस्य श्रुतिरूपो वर्णसङ्घात इत्यत्र तात्पर्यम् ॥ भाष्ये **उपदिश्यत इति**। अक्षरसमाम्नायोपदेशः [३]किमर्थः इत्यर्थः। पूर्वोक्तोऽप्ययं विचारः [४]कञ्चिद् विशेषं वक्तुं पुनः क्रियते **येन शास्त्रेणेति** ॥ चतुर्दशसूत्र्यात्मकेन तन्मूलकपाणिनिव्याकरणेन वेत्यर्थः ॥ **तत्**। शास्त्रम्। वाचो

---

१ आकाशादिवत् ॥ क ॥ ख॥ ङ ॥ २ इत्यस्य च ॥ क ॥
३ किमर्थः क्रियते इत्यर्थः ॥ क ॥ ४ किञ्चिद् ॥ क। ख ॥

विषयः। बन्धनं प्रतिपादकमित्यर्थः। भाष्ये **यच्च चेत्यनेन** वाक्-परामृश्यते इत्याह **पदे वर्त्तते इत्यादिना**।

शास्त्रं विषय इति प्रतिपादकमित्यर्थः। वर्णज्ञानं शास्त्रं वाचो विषयः। का सा वाग् **यच्च [1]ब्रह्मवर्त्तते**। चात्पुराणादि इति भाष्याक्षरार्थः॥ तदर्थमित्येतद्व्याचष्टे **शास्त्रप्रवृत्त्यर्थमिति॥**

कलादीति। इदं प्रयोजनं पस्पशाह्निके दूषितम्॥ **अनुबन्धकरणार्थमिति**। लघ्वर्थमित्यक्षराणामक्षार्धं स्वारस्य-च्छिन्न्यम्। अनुबन्धकरणमूलकप्रत्याहारद्वारा लाघवेन शास्त्रप्रवृ-त्त्यर्थमित्यर्थो वा॥ **वाक्समाम्नायः**। वाक्समङ्गहोपाय इत्यर्थः। तदाह **एतावद्भिरेवेति**। दृष्टफलेनाभ्युदयेन वा **पुष्पितः**॥ अदृष्टफलेन निःश्रेयसेन वा **फलितः**॥ **वाग्व्यवहारस्येति**। तत्समङ्गाहकस्य चतुर्दशसूत्रीरूपस्येत्यर्थः॥ यथा श्रुते हि भाष्ये अक्षरसमाम्नायोद्देशेन प्रवृत्तविशेषणानामन्यपरतया योजने भाष्य-विरोधः। अत एवैतत्प्रतीकमुपादायहरिणा**अस्याक्षरसमाम्ना-यस्य वाग्व्यवहारजनकस्य न कश्चित्कर्त्तास्त्येवमेव वेदे पारम्पर्येण स्मर्यमाणमिति** व्याख्यातम्॥

ब्रह्मतत्त्वमेवेति। तदुक्तं नन्दिकेश्वरेण "अकारः सर्ववर्ण्याग्र्यः प्रकाशः परमेश्वर" इत्यादिना सर्ववर्णानां मायेश्वररूपता। वर्णेभ्य एवच महदादिसृष्टिरित्यर्थपरतया चतुर्दशसूत्रीं योजयता। तदाह **सर्ववेदेत्यादि**। अन्ये तु वर्णज्ञानं चतुर्दशसूत्र्यात्मकं शास्त्रं वाचो वेदशास्त्रपुराणरूपायाः सकलवाचः विषयो बन्धनं

---

१ ब्रह्म च॥ क॥ ङ। ग॥

यत्र च वर्णसमाम्नाये ब्रह्मबोध्यतया वर्त्तते। व्याख्याता च एषा चतुर्दशसूत्री ब्रह्मपरतया नन्दिकेश्वरेण। तदर्थं सकलवाग्ज्ञानार्थं ब्रह्मबोधनार्थञ्च॥ अनेन सकलवेदाध्ययनेन यत्फलं तदक्षरसमाम्नायज्ञानेन सूचितम्। तदुच्यति **सर्ववेदेत्यादि**॥

सोऽयमित्यादिभाष्यग्रन्थश्चैतत्श्लोकपूर्वार्द्धस्यैव व्याख्यानपरः। तत्र **वर्णज्ञानमित्यस्य** व्याख्या **सोऽयमक्षरसमाम्नाय इति। वाग्विषय** इत्यस्य व्याख्या **वाक्समाम्नाय इति** सर्ववाग्रूपत्वात्। तदध्ययनतन्मूलव्याकरणाध्ययनाभ्यां **पुष्पितः। फलितः** तदर्थभावनया जनिततत्त्वज्ञानरूपफलः। **चन्द्रतारकवत्प्रतिमण्डित** इत्यनेनास्यानादित्वं सूचयति। तादृशोऽयं ब्रह्मराशिर्वेदितव्यः। बोध्यबोधकयोरभेदात्। **सर्ववेदेति**। सर्ववेदाध्ययनजन्यपुण्यरूपफलस्य[1] चित्तशुद्धिरूपस्य प्राप्तिरस्य ज्ञानेऽध्ययनमात्रे भवति। इदमेव पूर्वं पुष्पितत्वम्। तादृशपुत्रवत्त्वेन च मातापित्रोः स्वर्गे पूजा भवति। यथा कृतराजसूययुधिष्ठिररूपपुत्रेण पाण्डोः स्वर्गे पूजेति। **इष्टबुध्यर्थमित्यादि** तु प्राग्व्याख्यातत्वान्न व्याख्यातमित्याशयः॥

इति कालोपनामकशिवभट्टसुतसतीगर्भजनागोजिभट्टकृते महाभाष्यप्रदीपोद्योते
प्रथमाध्यायस्य प्रथमे पादे
द्वितीयमाह्निकम्॥

---

१ पुण्यफलस्य॥ क॥ ख॥ ङ॥ ग॥

महाभाष्यप्रदीपोद्योतः ॥

श्रीपाणिनिकात्यायनपतञ्जलिभ्यो गुरुभ्यो नमः ।



वृद्धिरादैच् ॥ १ । १ । १ ॥

द्विपदं सूत्रम् ॥

[1]कृतम् अनयोः साधुत्वम् (भा)

इति भाष्यदर्शनात् ॥ अन्यथा उद्देश्यानेकत्वाद् वृद्धिशब्दस्या-वृत्तिर्वाक्यार्थबोधाय कार्य्या स्यात् । द्वन्द्वे तु समाहारस्यैकस्योद्देश्यस्य शब्दतः सम्भवात् तां विनापि सिद्धति । न च समाहारे टच् प्रसङ्गः । समासान्तविधेरनित्यत्वात् ।

[2]प्रतेरंश्वादय (पा)

इति सूत्रेऽंश्वादिगणे राजन् शब्दपाठाल्लिङ्गात् । अन्यथा

---

१ एतत् सूत्रस्याग्रिमभाष्ये द्रष्टव्यम् ॥

२ पा – अ, ६. पा, २. सू, १९३ सिद्धान्तकौमुद्यां समासस्वरप्रकरणे एतत् सूत्रमस्ति) ॥

[1]राजाह (पा)

इति टचामिद्धे किन्तेन ॥ यद्वा पदत्रयम् । पस्पशायां भाष्ये

वृद्धिः, आत्, ऐजिति (भा)

पदविभागदर्शनात् ॥ वृद्धिशब्दस्त्रावृत्त्या योज्यः । अत्र पक्षे

[2]अनयोः (भा)

इति भाष्यं खण्डयोरित्यर्थकम् ॥ असाधुशब्दोच्चारणे पाणिनेरश्रद्धेयतापत्त्या तदुक्तपदानां साधुत्वं विचारयति भाष्ये

कुत्वम् (भा)

इत्यादि ।

ननु ऐच्छब्दस्य

[3]आदिरन्त्येन (पा)

इत्यनेन क्वचिन्मतया लौकिकवैदिकबहिर्भूतत्वेन कथं सुबादिशास्त्रप्राप्तिर्लोकिकत्वञ्च । लोकेऽर्थबोधनाय प्रयुक्तशब्दत्वमत आह

अनेकेति ॥ (कै)

नित्यत्वाच्चेति । (कै)

चो हेतौ । यतः शब्दार्थसम्बन्धस्य नित्यत्वात् सर्वसंज्ञानां

---

१ "राजाहःसखिभ्यष्टच्" पा – अ, ५. पा, ४. सू, ९१ ॥

२ "कृतमनयोः साधुत्वम्" इत्यत्र ॥

३ पा – अ, १. पा, १. सू, ७१ ॥

नित्यत्वमतो लौकिकत्वाच्छास्त्रप्राप्तिरित्यन्वयः ॥ लोकेऽर्थान्तरेऽप्रसिद्धानामपि संज्ञानां नित्यत्वमिति बोधयितुं

[1]"सर्व"शब्दः । (कै)

नन्वेवं

वृद्धिरादैच् (पा)

इत्यादीनां वैयर्थ्यमत आह

शक्तीति ॥ (कै)

शक्त्यवच्छेदः (कै)

तत् सङ्कोचः ॥

विनियोगो (कै)

विशेषे नियमः । अभिमतातिरिक्तार्थान्तरव्युदासाय च सः ॥ परिसङ्ख्यायाञ्चात्र शास्त्रे प्रायेण नियमव्यवहार इति बोध्यम् ॥ यद्वा,

शक्त्यवच्छेदः (कै)

शक्तिनिश्चयः । शब्दार्थस्यानवच्छेदे इत्यादाववच्छेदशब्दस्य तदर्थकत्वदर्शनात् । फलरूपे हेतौ तृतीया ।

विनियोग (कै)

उपदेशः । शक्तिनिश्चयफलकोपदेशादित्यर्थः ॥ एवं च तत् सङ्केतकरणरूपप्रकरणादर्थान्तराप्रतीतिरिति बोध्यम् ।

---

१ "सर्वसंज्ञानामि"त्यत्र सर्वशब्दः ॥

दृद मेव युक्तम् । सर्वार्थवाचकत्वेऽपि सङ्केतरूपत्वेनाज्ञातशक्ति-बोधकतया विधित्वसम्भवेनैषां नियमार्थत्वासंभवात् । नन्वेवं लौकिकार्थबोधो नस्यादत उक्तम्

अनेकशक्तेरिति । (कै)

स्वशास्त्रे एव प्रकरणादन्यार्थाबोध इति भावः ॥ अनेकस्मिन्नेका वा शक्तिरस्येति विग्रहः । अन्ये

[1]सर्वनाम्नो वृत्तिमात्र (वा)

इति पुंवत्त्वम् ।

[2]कोपधप्रतिषेधे तद्धितबुग्रहणा- (वा)

द्वा स्त्रि[3]या इति पुंवत्त्वम् । "आश्रयभेदादेव शक्तिभेद" इति मते आद्यम् । "निरूपकभेदाद्भेदे" द्वितीयः । "नित्ये शब्दार्थसम्बन्धे" पुरुषव्यापारात्प्रागवाचकस्य न पुरुषव्यापारेण वाचकता शक्याकर्त्तुमतः "सर्वे सर्वार्थवाचका" इत्यभ्युपगमादनेकशक्तित्वावश्यः । "तादात्म्यमेव च शब्दार्थयोः शक्तिः" । अत्र पक्षे गौणमुख्यविभागः प्रसिद्ध्याप्रसिद्धिमूलः । "अन्यायोऽनेकार्थत्वमि"तिलक्षणेयमेवेति निरूपितं मञ्जूषायाम् ॥ अत्र लौकिकशब्दत्वं साध्यम् । शास्त्रीयसंज्ञात्वसमानाधिकरणं नित्यत्वं हेतुरतो न वैदिकेषु व्यभिचारः । "सर्वसंज्ञानामि"ति वदता सूचितमिदम् । "अपूर्वाः संज्ञाः क्रियन्त" इति पक्षेऽपि लौकिकत्वं साधयति

---

१ (वा अ २ । पा २ । सू २६ ॥ अ २ । पा २ । सू २८ ॥)
२ वा अ ६ । पा ३ । सू ३७ ॥ ३ अ ६ । पा ३ । सू ३८ ॥

अनुकरणेति। (कै)

अयमपि लौकिकत्वे हेतुः।

[1]आदिरन्त्येने- (पा)

त्यनेन संज्ञात्वेन विनियुक्तस्यैव शब्दस्यानुकरणम्। सूत्रे लक्षणया तेनैवोपस्थापितयोरैकारौकारयोस्तात्पर्यवशाच्छाब्दबोधविषयतेति बोध्यम्। अनुकरणे च सर्वशब्दानां साधुत्वेन शास्त्रविषयतेति भावः॥ यत्त्वैजित्याद्यन्तावयवद्वारा समुदायानुकरणमिति तन्न। तथासत्या"दिरन्त्येने"तिसूत्रवैयर्थ्यापत्तेः। वृद्धिशब्दादेः शास्त्रविषयताया एवमप्यनुपपादनाच्च। नन्वनुकरणत्वाननुभवः किं च "त्रयीशब्दानां प्रवृत्तिरि"ति पक्षे उक्त हेतुद्वयस्याप्यभावोऽत आह

जातीति॥ (कै)

वैयाकरणव्यवहाराच्च तत् सिद्धिरिति भावः। अत्र पक्षे जातिबोधार्थमेव संज्ञासूत्राणीति बोध्यम्। अत्रापि पक्षे लौकिकत्वं संज्ञापक्षवदेव बोध्यम्। हरदत्तस्तु वृद्धिशब्दो वृधेर्भावे क्तिन्नन्तः। अभेदोपचाराच्च वृद्धियुक्तादैचु वृत्तिः। लक्षणयैव सिद्धे सूत्रं नियमार्थं वृद्धियुक्तप्लुतदीर्घैकारादीनां बोधो माभूदिति त्रयीपक्षे सूत्रार्थमाह तन्न।

[2]अदेङ्गुण (पा)

दित्यादावसंभवात्॥

---

१ अ१।पा१।सू७१॥ २ अ१।पा१।सू२॥

ननु [१]कुत्वमित्यत्र संज्ञात्वपक्षे ककारादिपंचकगतप्रवृत्तिनिमित्ताभावाद्भावप्रत्ययोऽनुपपन्नः । किं चात्र ककारस्य प्राप्तिर्न तु कुत्वत्तिधर्मस्येति कुत्वमित्यसंगतमत आह

तत्रेति ॥ (कै)

[२]आसक्तस्वरूपः । (कै)

संबद्धस्वरूपः ॥ एवं च कुग्रब्दः कुग्रब्दवत्ककारादिषु ग्रक्त इत्येवं ग्रक्तिग्रहात्कुग्रब्दस्य प्रवृत्तिनिमित्तत्वम् । संबन्धस्यानादित्यव्यवहारसिद्धतादात्म्यम् । तादात्म्येन कुग्रब्दं प्रवृत्तिनिमित्तीकृत्य ग्रक्तित्वेन तस्य ग्रहे बाधकाभावात् । केचित्तु ग्रब्दस्य स्वरूपं कुग्रब्दत्वं सामान्यं तत्कादिष्वारोपितं प्रवृत्तिनिमित्तं तद्ग्रक्तिश्च[३] वाचिकेत्याहुः । तेन च [४]कुत्वग्रब्देन स्वार्थाश्रयः ककारो लक्ष्यते इति ककारः कस्मान्नेति चोद्यपर्यवसानम् । वस्तुतः कुत्वकुपदयोर्भत्वभसंज्ञापदयोश्च पर्यायतेति [५]सूत्रक् सूत्रे निरूपितमिति न कश्चिद्दोषः ॥

अङ्गत्वात् । (कै)

पदपदार्थकथनद्वारा वेदोपकारकत्वात् । "मुखं व्याकरणमि"त्यादिनाङ्गत्वनिरूपणाच्च ।

प्रधानं च षट्स्वङ्गेषु व्याकरणमिति (भा)

---

१ भाष्ये ॥ २ आसक्तरूपः । क । ख । ग । ङ ॥
३ वाधिकेत्याहुः । ख ॥ ४ कुग्रब्देन । क । कुत्वग्रब्दे । ङ ॥
५ अ १ । पा १ । आ १ । सू २ ॥

पस्पशायां भाष्योक्तेश्च । "[1]अस्यामिष्टौ नार्षत्वं प्रयोजकं नैषेष्टिरस्ति छन्दोवत्कवयः कुर्वन्तीति" [2]यूस्त्याख्याविति सूत्रे भाष्योक्तेः । तस्माद्ङ्गत्वमेव प्रयोजकमिति भावः ॥

ननु छन्दसि विहितस्य सूत्रे कथं प्रवृत्तिरत आह

इष्टिरिति । (कै)

तथा च [3]भाष्यकारीयातिदेशात्सूत्रेषु छन्दः कार्यप्रवृत्तिरिति भावः ॥ भाष्ये

जश्त्वमपीति । (भा)

संहितया पाठे इत्यर्थः ॥

उभयसंज्ञान्यपीति । (भा)

उभे संज्ञे येषामिति विग्रहः । संज्ञाद्वयहेतुककार्यदर्शनेन तद्वत्त्वकल्पनेति भावः ॥

ननु सूत्रादादैज्मात्रग्रहणपक्ष एव प्रतीयते इति प्रश्नानुपपत्तिरत आह

उभयथेति । (कै)

लुगादिसंज्ञासु तङ्गावितपक्षस्य लोपसंज्ञायामदर्शनमात्रस्येति भावः ॥ ननु टिघुभादिसंज्ञास्वतङ्गावितानामेव ग्रहणं दृश्यत इति

---

१ "अस्यामिष्टौ" इत्यारभ्य "इति भाव" इत्यन्तं नास्ति । इ ॥

२ अ १ । पा ४ । सू ३ ॥

३ "छन्दोवत् सूत्राणि भवन्ती"त्यतिदेशात् । आ ३ । भा ॥

सोऽपि पचः ग्रङ्कितुमुचित इति चेन्न। तत्र हि तङ्गावितासंभवादतङ्गावितानामेव ग्रहणं न च तथा प्रकृते इति "उभयथे"त्युक्तम्। वृद्धिग्रब्दे तन्त्राद्यङ्गीकारे तङ्गावितग्रहणं वृद्धिग्रब्दैकत्वे द्वितीयः पच इति भावः॥ भाष्ये

वृद्धिलक्षणो मयडिति। (भा)

[1]नित्यं वृद्धग्रादिभ्य (पा)

इति। अस्य [2]वृद्धसंज्ञाद्वारा वृद्धिलक्षणत्वं बोध्यम्। वृद्धलक्षण इति पाठे एषां वृद्धित्वाभावेन समुदायानां वृद्धत्वाभावादित्यर्थः॥

फिञिति। (भा)

[3]उदीचां वृद्धादगोत्रादिति। (पा)

न च [4]प्राचामवृद्धादिति (पा)

फिनाप्येतत्सिद्धम्। पुंवद्भावनिषेधोऽप्याम्रगुप्तायनीभार्य इत्यादौ

[5]जातेश्चेति (पा)

सिद्ध इति वाच्यम्। आम्रगुप्तायनेरपत्यं युवेत्यर्थेऽणो

[6]ण्यक्षत्रियार्षञित (पा)

इति लुकि आम्रगुप्तायनिरित्येवरूपं पितरि पुत्रेच्छ्यते फिनि तु ञितः परत्वाभावान्नसिध्येत्। नचाब्राह्मणगोत्रमात्राद्युवप्रत्ययस्योपसंख्यानमिति तत्सिद्धिः। ब्राह्मणगोत्रे तदप्रवृत्तेः॥ भाष्ये

---

१ अ ४। पा ३। सू १४४॥ २ अस्य वृद्धिसंज्ञाद्वारा। क॥
३ अ ४। पा १। सू १५७॥ ४ अ ४। पा १। सू १६०॥
५ अ ६। पा ३। सू ४१॥ ६ अ २। पा ४। सू ५८॥

एष विधिरिति। (भा)

पूर्वपदान्तोदात्तत्वमित्यर्थः। तावद्वार्थे

[1]आ सर्वनाम्न (पा)

इत्यालस्य वतुर्निमित्तमिति पुंवत्त्वनिषेध प्राप्तिः। यदि प्रथमपदे दोषो दुरुद्धरोऽ"सु [2]तर्हो"त्यन्वयः॥ भाष्ये

तद्धत्युत्तरपद इति। (भा)

समासाच्चित्रोत्तरपदग्रब्देन सामानाधिकरण्यायोत्तरपदस्थेत्येवं वृद्धिर्यस्मिन्निति बहुव्रीहिरिति भावः॥ तत्राधिकारलक्षणायां बीजमाह

तत्र हीति। (कै)

न च आ अवतीति औः सर्वस्य औः सर्वौरित्यादौ वृद्धिरूपोत्तरपदसंभवः। नचैकादेशे व्यपवर्गाभावः।

[3]नेन्द्रस्येति

निषेधेन [4]पूर्वोत्तरपदसंबन्धिकार्यस्यैकादेशात्प्राक् प्रवृत्तिस्वीकारात्। तथा च सर्वग्रब्दान्तोदात्तत्वे शेषनिघातेनौकारस्यानुदात्तत्वे एकादेशस्य

---

१ अ ६। पा ३। सू ९१॥ २ भाष्ये।
३ अ ७। पा ३। सू २२॥ ४ सर्वोत्तरपदसम्बन्धि। क॥

[1]स्वरितो वानुदात्त (पा)

इति पाचिकः स्वरितः स्यादिति वाच्यम् । तादृशानामभिधाने दृढतरमानाभावात् । स्वरितत्वाद्वाधिकारलाभ इति बोध्यम् ॥

अन्यथा वृद्धेरिति । (कै)

[2]वृध्यात्मकतद्धितानामभावाद्वृद्धिनिमित्तग्रहण[3]मिति भावः ॥

[4]ननु अर्ग्यशब्दाद्

[5]अर्ग्य आद्य- (पा)

चि टाप्यर्ग्यसेत्यादौ वृद्धिरूपसम्भवइत्यरूचेराह

अथवेति । (कै)

व्यधिकरणबहुव्रीह्याश्रयणसामर्थ्यादेवव्यपदेशिवद्भावाप्रवृत्तिरिति भावः ॥

तेषामेवेति । (कै)

एव शब्दोऽन्यर्थे । विशिष्टस्य निमित्तत्वे विशेषणानामपि तत्त्वमिति भावः ॥ ननु वृत्तावभेदैकत्वसंख्यावगतेर्बहुवचनान्तेन विग्रहोऽनुपपन्नोऽत आह

---

१ अ ८ । पा २ । सू ६ ॥

२ वृद्ध्यात्मकस्तद्धितभावात् । क ॥

३ वृद्धिनिमित्तग्रहणं व्यधिकरणबहुव्रीह्याश्रयणाद् । ख । ग ॥

४ "ननु अर्ग्यशब्दाद्" इत्यारभ्य "अथवेति"त्यन्तं नास्ति ॥ क ॥ ख ॥ इ ॥ ग ॥

५ अर्ग्य आदिभ्योऽच् । अ ५ । पा २ । सू १२७ ॥

निमित्तेति। (कै)

तत्र [1]कार्त्स्न्यप्रतिपत्तिकाङ्क्षिकं न प्रयोगसमवायीति न पारिषद्याभार्ये दोषः। न च वैयाकरणभार्येऽपि निषेधापत्तिः॥ दृष्टापत्तेः। अत एव।

आदैज्माचस्येति

पचेऽत्र दोषानुद्भावनम्।

तद्भावितानामेवेति

पचेऽपि

[2]न व्याभ्यामिति (पा)

सूत्रे ऐजग्रेऽपि वृद्धिपदसंबन्धेन निषेधप्रवृत्तिरत्र सूपपादा॥ अत एव

[3]दैविकाशिंशपेति (पा)

सूत्रे भाष्यकृता तत्संबन्धो दर्शित इत्याहुः। आदैज्माचग्रहणादेव

[4]मालादीनांचेति (पा)

सार्थकम्। अन्यथाऽस्यावृद्धत्वात्

[5]प्रस्थेऽवृद्धमि- (पा)

त्येव सिद्धे किं तेन॥

---

१ कार्त्स्न्यं। इ। ख। क॥ कार्त्स्न्ये। ग॥ २ अ ७। पा ३। सू ३॥
३ अ ७। पा ३। सू १॥ ४ अ ६। पा २। सू ८८॥
५ प्रस्थेऽवृद्धमकर्ष्वादीनाम्॥ अ ६। पा २। सू ८७॥ समास स्वरप्रकरणे (सि कौ)।

वार्त्तिकमिति। (कै)

सूत्रेऽनुक्तदुरुक्तचिन्ताकरत्वं वार्त्तिकत्वम्। एतेन सूत्रव्याख्यानाय प्रवृत्तस्य कात्यायनस्यायुक्ता दुरुक्तचिन्तेत्यपास्तम्॥

प्रस्तावेति। (कै)

वार्त्तिकेऽधिकारशब्दोक्तः स इति भावः॥ वृद्ध्यादीनां संज्ञात्वाद्भेदनिबन्धनषष्ठ्यनुपपत्तेत्यत आह

संप्रत्यय इति॥ (कै)

भाष्ये

संज्ञेत्येष (भा)

इति। शब्दार्थज्ञानानामितरेतराध्यासादिदं नानुपपन्नम्॥

भाष्यकारस्त्विति। (कै)

अधिकारं विनाऽसंप्रत्यये दृष्टान्तस्य लौकिकस्याभावादर्थापरिज्ञाने दृष्टान्तानुपयोगाच्चेति तद्भावः॥

वाक्याध्याहारेणेति। (कै)

"[1]इदमिदानीमिति" वाक्याध्याहारेणेत्यर्थः॥ ननुद्विगौ अकारान्तोत्तरपदत्वात् स्त्रीत्वे ङीप्स्यादत आह

बहुव्रीहिरिति॥ (कै)

अन्यपदार्थस्याशब्दत्वाद्बहुव्रीहिर्दुर्ज्ञेयोऽत आह

समाहार इति। (कै)

[2]पात्रान्तादित्वात् स्त्रीत्वाभावः। अत एव त्रिसूत्रीत्यादिसंगच्छते।

---

१ अत्रैव भाष्ये॥

२ पात्राद्यन्तस्य नेति वार्त्तिकेन॥ वा अ २। पा ४। सू ३०॥

बह्वसूचत्रशब्दस्यैव तत्रपाठादित्यभिमानः ॥ नन्वनर्थकदृष्टान्तोऽर्थवन्तो-त्यादिव्यर्थमत आह

यथेति ॥ (कै)

यद्यप्यन्वितार्थकपदसमूह एव वाक्यं तथापि भाष्ये [1]पदसमूह एव वाक्यशब्दः प्रयुक्तोऽतोऽ-

[2]नर्थकानि वाक्यानीति (भा)

न विरुद्धम् ॥

झटिति । (कै)

विनाचार्याचारादिज्ञानेन ॥

पदार्थानाम् । (कै)

कुण्डमजाजिनमित्यादीनाम् ॥ स्फायकृतोऽपत्यं स्फैयकृतः । उप-चारो नाम गौणी वृत्तिरिति भ्रमं व्युदस्यति ।

व्यवहारादिति । (कै)

अनेन व्यवहाराच्छक्तिग्रह उक्तः स च शक्तिग्राहकाग्रिरोमणिः । भाष्ये

वेदे याज्ञिका (भा)

दति । यज्ञकाण्डद्रष्टार ऋषय इत्यर्थः ॥ वेदकर्तृत्ववत्संज्ञाकर्तृत्वं तेषां द्रष्टव्यम् ॥

भाष्ये

---

१ पदसमूहे एव । ख ॥

२ अत्रैव भाष्ये ।

इहैवेति । (भा)

"वृद्धिरादैच्" सूत्रे एवेत्यर्थः ॥ असत्याः प्रकृतेर्व्याख्यानेनोत्पादयितुमशक्यत्वादाह

वृद्धिशब्दस्येति ॥ (कै)

प्रत्यायनशक्तिः । (कै)

प्रत्यायने बोधजनने कारणीभूता शक्तिः । भाष्ये

उदाहरन्तीति । (भा)

"वृद्धिरादैजि"ति सूत्रार्थकथनार्थं तत्प्रदेशत्वेन सि[1]चि वृद्धिरित्युक्ता तदुदाहरणत्वेनाकार्षीत् अचैषीद्[2] अश्रौषीदित्युदाहरन्नीत्यर्थः । एवं च वृद्धिशब्दस्य प्रत्यायकत्वमादैचां प्रत्याय्यत्वं निर्णीय "वृद्धिरादैच्" सूत्रस्य संज्ञाबोधकत्वं वृद्धिशब्दस्य संज्ञात्वं च निर्णयन्नीति भावः ॥

तेन । (भा)

अपराचार्योक्तोदाहरणेन ॥ नन्वाकृतिर्जातिस्तद्भेद आदैच्त्वपि तदभावस्तु न वृद्धिशब्देऽपीत्यत आह

आकृत्येति । (कै)

बहुव्रीहिरिति भावः ॥ "अनाकृतिरि"त्येतन्न्यायसिद्धमित्याह

लाघवार्थमिति ॥ (कै)

नन्वेकस्यापि तत्तदेरनेकाः क्तक्तवत्प्रत्ययसंज्ञाः क्रियन्तेऽत आह

---

१ अ ७ । पा २ । सू १ ॥

२ अश्रौषीदिति राजकीयपाठशालास्थपुस्तके नास्ति ॥

प्रयोजनेति। (कै)

सति हि प्रयोजने तथा। प्रकृते तु न तथा। प्रयोजनाभावादिति भावः॥

प्रत्यभिज्ञानिमित्तकम्। (कै।

प्रत्यभिज्ञाप्रमाणकमित्यर्थः॥ वस्तुतो भाष्ये

आकृतिमत (भा)

दृत्यस्य भेदवत दृत्यर्थः। अवस्थाभेदेन च तत्रारोपितः सः। आरोपितभेदे च जातिसत्त्वे न मानम्। अत एव देवदत्तेत्यादौ न ङीषिति कश्चित्॥

स कथं वृत्तिकारानिति। (कै)

तस्यैवेति (भा)

भाष्यस्य तदीयस्यैवेत्यर्थ [1]इति भावः॥

[2]लिंगेन वेत्येतदिति। (कै)

लिंगाऽऽसंगः। दृत्यं लिंगासंज्ञेति[3] च वक्तव्यमित्यर्थः॥

ङकारादिष्विति। (कै)

धात्वादिपठितेष्वित्यर्थः॥ ननु संज्ञालिङ्गे कृतेऽपीत्संज्ञाद्यभावे कथं तेषां निवृत्तिरत आह भाष्ये

---

१ "इति भाव" इत्यारभ्य "धात्वादिपठितेष्वित्यर्थ" इत्यन्तं नास्ति॥ ख॥

२ लिङ्गेनचेत्येतदिति। इ॥

३ इत्यं लिङ्गासङ्गेति॥ क॥

स्वभावतः संज्ञेति । (भा)

तद्व्याचष्टे

संज्ञा संज्ञिनमिति ॥ (भा)

भाष्ये

अपाणिनीयन्विति । (भा)

अनन्तरश्लोके दोषविशिष्टपठने आनुनासिक्यादिवत् [1]प्रतिज्ञाकरणे च दुर्ज्ञेयत्वादिति भावः ॥ ननु भवतेर्जन्मार्थत्वेना[2]भूततद्भावप्रतीत्या चौ सति प्रमाणीभूत इति स्यात्तद्विवक्षायां तु प्रमाणमाचार्यः प्रकारान्तरेण भूत इत्यर्थः स्यादत आह

प्रामाण्यमिति ॥ (कै)

वृत्तिविषये (कै)

इति प्रकृताभिप्रायम् ॥

प्रमादः (कै)

पिशाचादिसंबन्धः ॥

आगमः (कै)

संप्रदायः । प्रकृतभाष्योक्तिर्वा ॥

---

१ प्रतिज्ञाकरणं च । इ ॥

२ अभूततद्भावे कृभ्वस्तियोगे संपद्यकर्तरि च्विः । अ ५ । पा ४ । सू ५० ॥ इत्यनेनाभूततद्भावेऽर्थे "च्विः" ॥

भाष्येऽनर्थकेनेति । (भा)

बोध्यार्थरहितेनेत्यर्थः । तेन पाराय्ये सर्वेषामदृष्टार्थत्वेऽपि दृष्टप्रयोजनराहित्यरूपमनर्थकत्वं वर्णपदसूत्राणामस्त्येवेति न वक्ष्यमाणसूत्रादिप्रत्याख्यानासंगतिः ॥

संज्ञासंप्रत्ययाय । (कै)

संज्ञात्वनिश्चयाय । भाष्ये

किमत इति । (भा)

अतस्तादृशकर्त्तृकत्वात् किं कथमर्थवत्त्वं यत् यतस्तदृशक्यनिरूपणमित्यक्षरार्थः ॥

साध्वनुशासने (भा)

इत्यनेन साधुत्वपक्षस्याकाण्डता वारिता ॥

इन्द्रत्वादिति । (कै)

अनयोरि- (कै)

त्यस्य पदयोरिति विशेष्यम् । पदानामेव साधुत्वान्वाख्यानादिति भावः ॥ भाष्ये

अविशेषेणेति । (भा)

प्रत्ययविशेषमनादायेत्यर्थः ॥

ननु वर्णसमाम्नाये आकारादुपदेशेऽण्यादैच्छब्दस्य किमागतमत आह

तेषां चेति । (कै)

संज्ञाग्रहणद्वारेणेति शेषः ॥

[1]तपर इति (पा)

[2]आदिरन्त्येनेति च (पा)

तेषां कृतयोरादैच्संज्ञयोर्द्वन्द्वनिर्देशेन द्वन्द्वशास्त्रेण कृतं साधुत्वमित्यर्थः॥ ऐजित्यपि तन्मूलका"दिरन्त्येने"त्यनेन बोधितमित्याशयेन भाष्ये

[3]अक्षरसमाम्नाय उपदिष्टा (भा)

दित्युक्तम्। ननु "उपसर्जनं पूर्वं परञ्चे"त्यादिभिः प्रयोगनियम आरभ्यत एवेत्यत आह

प्रयुज्यत इति॥ (कै)

स्वतन्त्रस्येति। (कै)

गत्युपसर्गनिरासः। तौ हि द्योतकत्वात्परतन्त्रौ॥

पदावयवस्येति। (कै)

[4]आदिना द्योतकाः। युक्त्यन्तरमाह

लोकेचेति। (कै)

शिष्टलोकाभिप्रायं प्रयुक्तानां चेदमनुशासनमिति भावः॥

केवलः। (कै)

आदैच्पदा[5]संबद्धः॥ भाष्ये

---

१ अ १। पा १। सू ७०॥
२ अ १। पा १। सू ७१॥
३ अत्रैव भाष्ये॥ ४ अत्रैव कैयटे॥
५ आदैच् पदासम्बन्धः। इ॥

संस्कृत्येति (भा)

[1]साधुत्वेनान्वाख्यायेत्यर्थः।

अभिसंबन्धः। (भा)

पौर्वापर्यलक्षणः॥ षष्ठ्यभावेऽपि

[2]**नाभिनभमि-** (पा)

त्यादौ आदेशग्रहणादाह

स्थानेति। (कै)

[3]**षष्ठीस्थाने** (पा)

इति सूत्रगत इति शेषः। तत्र हि सूत्रे स्थानशब्दोऽधिकरणव्युत्पत्त्याऽर्थवाची भावव्युत्पत्त्या प्रसंगवाची च तन्त्रेणोपादीयते। अन्यथा[4] केवलार्थशब्दं प्राप्निशब्दं वोपाददीत। एवं च याऽनियोगा षष्ठी सा प्रसङ्गनिरूपितसंबन्धार्थिकैवेत्येकोऽर्थः। द्वितीये तु षष्ठीशब्दो लक्षणया स्थानिपरः।

स्थाने

इति सप्तमी वाच्यस्यार्थस्याधिकरणत्वविवक्षया बोध्या॥ योगशब्दश्च युज्यते इति व्युत्पत्त्या आदेशवाची। ततो[5]ऽर्ग आद्यच्। तेन स्थानी स्वार्थाभिधानसमर्थादेशवानित्यर्थ इति भावः॥ भाष्यस्य तु

---

१ साधुनान्वाख्यायेत्यर्थः॥ इ॥

२ उगवादिगणसूत्रम्। उगवादिभ्योयत्॥ अ ५। पा १। सू २॥

३ अ १। पा १। सू ४९॥

४ अन्यथा केवलार्थशब्दं वोपाददीत॥ इ॥

५ अर्ग आदिभ्योऽच्। (अ ५। पा २। सू १२७॥) इत्यनेन॥

षष्ठी निर्दिष्टस्य स्थानिनो योऽर्थस्तस्य [1]वाचका उच्यन्ते न चाचा-दैचु षष्ठीनिर्दिष्टस्थानिनोऽर्थमभिधेयत्वेन पश्याम इत्यर्थः ॥

षष्ठ्यर्थाभावादिति । (कै)

षष्ठीबोध्यस्यान्यर्थाभिधानसामर्थ्याभावादिति भावः ॥

तदर्थसङ्गावादिति । (कै)

आदेश्यस्य स्यान्यर्थबोधनसामर्थ्यसङ्गावादित्यर्थः । वस्तुतस्तु स्थानं प्रसङ्ग एव स चार्थवत एव । अर्थप्रत्यायनाय शब्दप्रयोगात् । एवं चार्थप्रयुक्त एव स्थान्यादेश्ययोः सम्बन्ध इति स्थान्यर्थाभिधानसमर्थ-स्यैव आदेश्यतेति वदन्ति ॥

अचापीति । (कै)

वस्तुतोऽवयवषष्ठ्यैवागमा उच्यन्ते इत्यर्थो भाष्यस्य । कलादिलि-ङ्गभ्रमव्यावृत्तये आह ।

देश्येति । (कै)

देश्यविशेषप्रतिपत्त्यर्थयत्नसाध्यागमप्रतीति[2]र्न यत्नं विनेत्यर्थः ॥

इदं खल्वपीति (भा)

भाष्यं पूर्वोक्तपक्षाणामसंभवं प्रतिपादयति[3] तद्व्याचष्टे

विशेषणेति ॥ (कै)

---

१ "आदेश्याः" इत्यधिकम् । ख ।

२ प्रतीतिर्यत्नाभावेनेत्यर्थः ॥ क ॥ ख ॥ इ ॥

३ "तद्व्याचष्टे विशेषणेति" इति नास्ति । इ । ख । ग ॥

अस्ति सामानाधिकरण्यमिति। (कै)

न च[1] तादृग्रे संज्ञासंज्ञित्वसंभावनेति भावः॥

इत्युभयोरिति। (कै)

विग्रेषणविग्रेष्यत्वसंज्ञासंज्ञित्वसंभावनास्वत्वप्रदर्शनायेत्यर्थः॥

संज्ञासंज्ञिनोरपीति। (कै)

उद्भिदादिसंज्ञा हि स्वरूपेणैव संज्ञिनं सजातीयाद्यागान्तरा-द्विजातीयाच्च होमादेर्व्यवच्छिनत्तीति विग्रेषणम्। संज्ञी च व्यव-च्छेद्यः सन् विग्रेष्यः। विषयताविग्रेषरूपमपि तत्तयोरस्त्येवेति भावः॥

प्रसिद्धीति। (कै)

"[2]द्वयोर्हि प्रतीते"त्यादिना भाष्ये उक्तमेतत्। यद्वा सत्यपि व्यवच्छेद्यव्यवच्छेदकभावे संज्ञासंज्ञिनो[3]र्विग्रेषणविग्रेष्यभावो लोके न प्रसिद्ध इत्यर्थः॥ ननु सामानाधिकरण्यं नाम द्वयोः ग्रब्दयोरेका-भिधेयसंबन्धस्तत्तु न युक्तम्। सामानाधिकरण्यस्य ग्रब्दधर्मत्वेन विग्रेषणत्वादेश्चार्थधर्मत्वेन विग्रेषणविग्रेष्ययोः सामानाधिकरण्यमिति [4]भाष्यासंगतेः। संज्ञासंज्ञिनोरेकाभिधेयसंबन्धाभावेन संज्ञासंज्ञिनोर्वा सामानाधिकरण्यमित्यस्याप्यसंगति[5]रत आह

---

१ न च तादृग्। ख॥ २ "द्वयोर्हि प्रतीतपदार्थकयोर्लोके विग्रेषणविग्रेष्यभावो भवति"। अत्रैवाग्रे उक्तम्॥
३ विग्रेष्यविग्रेषणभावः॥ क॥ ख॥ इ॥ ४ भाष्यासंगतिः॥ क॥
५ सामानाधिकरण्यमित्यस्याप्यसङ्गतेः॥ ख। इ॥

तत्त्विति ॥ (कै)

भिन्नप्रवृत्ती- (कै)

त्यनेन पर्यायनिरासः । वस्तुत इदं चिन्त्यम् । "अग्ने देवि सरस्वति इडे काव्ये विहव्ये एतानि तेऽघ्ने नामानी"त्यादौ

[1]नामन्त्रिते समानाधिकरणे (पा)

इत्यस्य व्यावृत्तये तच्च "सामान्यवचनग्रहणमिति" तत्सूत्रस्थभाष्यविरोधापत्तेर्युगपदधिकरणवचनता पक्षे पद्वीमद्ब्रावित्यत्र समानाधिकरणलक्षणपुंवद्भावग्रङ्कापरभाष्यविरोधापत्तेश्च विशेषणत्वादिकं चोपपद्यत इत्याह

विशेषणेति ॥ (कै)

भाष्ये

संज्ञासंज्ञिनोरि- (भा)

त्यत्र संज्ञिपदेन [2]संज्ञिसमर्पकः शब्दोऽभिप्रेतः । संज्ञाशब्दे च शब्दः प्रवृत्तिनिमित्तं संज्ञिनि तत्संबन्धात् । संज्ञिबोधकशब्दे च संज्ञिगततत्तद्धर्मः[3] प्रवृत्तिनिमित्तम् । एवं च वृद्धिशब्दवदभिन्ना आदैच इति बोधः । वृद्धिशब्दवत्त्वं च लोकसिद्धतादात्म्येनेत्याशयः ॥

अन्ये त्विति । (कै)

[4]संज्ञासंज्ञिनोस्तूक्तं प्रवृत्तिनिमित्तमिति सामानाधिकरण्यम् ।

---

१ अ ८ । पा १ । सू ७२ ॥

२ संज्ञिसमर्पकशब्दः ॥ क ॥

३ तत्तद्धर्मप्रवृत्तिनिमित्तम् ॥ क ॥ ख ॥

४ संज्ञासंज्ञिनोस्तूक्तप्रवृत्तिनिमित्तमिति ॥ ख ॥

एकविभक्ति[1]कत्वञ्च पक्षे शब्दद्वाराबोध्यम् । विभक्तिशब्देन शक्ति-र्वा । भाष्ये

[2]संज्ञासंज्ञिनोः (भा)

इत्यस्य तत्प्रवृत्तिनिमित्तयोरित्यर्थः ।

अन्ये त्विति- (कै)

मतेऽरुचिबीजन्तु

[3]प्रतीतपदार्थकयोरिति (भा)

बहुव्रीहिस्वरसभङ्गः ।

[4]विशेषणविशेष्यभावो भवती- (भा)

त्यस्य तदर्थप्रतिपादकत्वं भवतीत्यर्थः॥ ननु वैयाकरणानामादै-च्छब्दः प्रतीतपदार्थ[5]एवेत्यत आह

न हीति । (कै)

वृद्धिशब्दार्थान्वययोग्य इति शेषोऽत्र द्रष्टव्यः । केचित्तु वृद्ध्या-दिशब्दाः शब्दपरा एव वृद्धिशब्दाभिन्ना आदैच इति [6]बोधः । तदुक्तं हरिणा

---

१ एकविभक्तित्वं त्वत्र ॥ क ॥

२ "विशेषणविशेष्ययोर्वा संज्ञासंज्ञिनोर्वा" इत्यत्र ॥

३ अत्रैव भाष्ये ॥

४ अत्रैव भाष्ये ॥

५ प्रतीतपदार्थक एवेत्यत आह ॥ क । ख । ग । ङ ॥

६ इति शेषः ॥ ङ ॥

वृद्ध्यादयो यथा शब्दाः स्वरूपोपनिबन्धनाः। आदैच् [1]प्रत्यापितैः शब्दैः सम्बन्धं यान्ति संज्ञिभिरिति॥

सामानाधिकरण्यं चैकविग्रेष्यकप्रतीतिजनकत्वमित्याहुः॥ भाष्ये

यचोभे (भा)

इति। प्रत्ययः। अनीयरित्यादौ।

लघ्वर्थमि- (भा)

त्यस्य लाघवार्थमित्यर्थः॥

न मांसपिण्ड इति। (भा)

दूरस्थस्यापि नामोच्चारणमात्रेण दानादिसंभवादिति भावः॥

सतो हौ- (भा)

त्यादिना न भावरूपं विवक्षितम्। अभावस्यापि लोपादिसंज्ञादर्शनात्। नापि विद्यमानत्वं प्रत्ययविधौ संज्ञाविग्रिष्टस्यापि विधानादत आह

बुध्येति। (कै)

अत एव "सावर्णिर्भवितामनुरि"त्यादौ न दोषः। एवं च सच्छब्देन [2]पूर्वं बुद्ध्याविषयीकृतत्वं विवक्षितमित्यर्थः। बुद्धिसत्ता-

---

१ प्रत्यायितैः। सम्॥

२ पूर्ववुद्ध्याविषयीकृतत्वम्। इ।

माविष्ट [1]एवचार्थः शब्देन बोध्यत इति सिद्धान्तात् ॥ तत्त्वं हि पूर्वोच्चारितस्यैव भवतीत्याह

शब्देन पूर्वमिति ॥ (कै)

भाष्ये

माङ्गलिको (भा)

मङ्गलप्रयोजनः ।

महतोऽ- (भा)

र्थतः । एकैकं सूत्रं शास्त्रमिति

शास्त्रौघस्य (भा)

दृत्युक्तम् ।

मङ्गलादीनी- (भा)

त्यादिना स्वप्रयोजनं श्रोतृप्रयोजनं चोक्तम् ।

प्रथन्ते । (भा)

विस्तृतानि भवन्ति । तेन समाप्तिरर्थाच्चिप्ता ॥

आर्थत्वन्यथेति । (कै)

आदैच् वृद्धिरित्याकारः । आनुपूर्वीज्ञानस्याऽऽसक्तिविधया हेतुत्वादिति भावः ॥ कथं तर्हि वृद्धिशब्दस्य संज्ञात्वप्रतीतिरत आह

---

१ एवार्थः शब्देन —। ख ॥

अन्ये त्विति । (कै)

लाघवादयः । आदैचो वृद्धिपदाभिन्ना इत्यर्थः । एवं चानुपूर्वीव्यत्यासेन विलम्बेन बोधजनकशब्दोच्चारणं मङ्गलार्थं चम्यतामिति बोध्यम् ॥ अत्रैकशब्दः प्रथमार्थकः । प्रथमं तथाकरणं मङ्गलार्थमेव । एवं चान्यत्रापि तथाकरणम् उद्देश्य विधेयभावेनान्वये तादृशस्यैव साधुत्वमिति भ्रमवारणार्थमित्याहुः ॥

परिभाषेति । (कै)

तदा हि यचाऽपृक्तपदं तच्चेकालित्याद्युपतिष्ठत इत्यर्थात् प्राथम्यं युक्तमेवेत्यर्थः । वस्तुत इदं वृद्धिसूत्रेऽपि सुवचम् । किं चैवमपृक्तसंज्ञायामित्यादिभाष्यवार्त्तिकव्यवहारानुपपत्तिः । केचित्तु परिभाषात्वेऽपि एकाल् [१]प्रत्यय [२]इत्येतदुद्देश्येनापृक्तपदवद्देश्यत्वं विधेयम् । पदपरत्वार्थन्तत्वापि लक्षणावश्यकत्वेन [३]सामानाधिकरण्याच्चार्थन्तावत्पर्यन्तलक्षणाया उचितत्वात् । पदत्वाधाधारे गौरवाच्च ॥ एवंच परिभाषात्वेऽप्युद्देश्यत्वेन तस्यैव [४]पूर्वं पाठोयुक्तः । आनुपूर्वीव्यत्यासाद्बोधस्तुभयोः सम इति वदन्ति ॥ भाष्ये

अनुवर्त्तयस्यादिति । (भा)

तच्चामम्बद्धबहुव्यवायादशक्यमिति भावः ॥

---

१ अपृक्त एकाल्प्रत्ययः ॥ अ १ । पा २ । सू ४१ ॥

२ इत्याद्युद्देश्येन ॥ ख ॥

३ सामानाधिकरण्यार्थं तावत् । ख ॥

४ तस्यैव पूर्वपाठो युक्तः । ख । ग । इ ॥

अस्थाने । (भा)

अनवसरे ।

भिद्यते । (भा)

विलक्षणं भवतीत्यर्थः ॥

अभिसम्बन्धः । (भा)

संज्ञासंज्ञिभावः । ततो ज्ञातुं शक्य इति भावः ॥

तस्याज्ञतः (भा)

इत्यस्य तेनाज्ञात इत्यर्थः ॥ तथा च तेन कथं प्रतिपत्तुं शक्य इति भावः ॥

अथ तचेति । (भा)

अनुमानादिना ज्ञात इत्यर्थः ॥

सतो वृद्ध्यादिष्विति । (कै)

सतो निष्पन्नस्य ॥

संज्ञाभावात् । (भा)

संज्ञासम्बन्धात् ॥

तदाश्रये (भा)

संज्ञाश्रये । संज्ञया संज्ञिविधायके शास्त्रे

[1]मृजेर्वृद्धिः (पा)

इत्यादौ वृद्ध्यादिपदेषु

---

१ मृजेर्वृद्धिः । अ ७ । पा २ । सू ११४ ॥

इतरेतराश्रयत्वाद्प्रसिद्धिः (भा)

वाक्यार्थाप्रसिद्धिरित्यर्थः॥ अविद्यमाने सम्बन्धस्य वक्तुमशक्यत्वादिति भावः॥ वहनक्रियायामितरेतराश्रयत्वाभावेऽपि तत् फलतीत्याह

नौ (कै)

इति॥

सामर्थ्यन्तरेति। (कै)

कारणान्तरेत्यर्थः॥

सूचकम्।(भा)

कीलादि। न च सामान्यलक्षणया भूतभाविसकलविषयकशक्तिग्रहः संभवत्येव। अन्यथा तवापि तत्तद्वोद्धृबुद्धावसन्निहितसकलाकारविषयकशक्तिग्रहासंभवेनानुवादेऽपि दोषः स्यात्। सामान्यलक्षणानङ्गीकारेऽपि शक्तिग्रहबोधादीनां समानप्रकारकत्वेनैव कार्य्यकारणभावाभ्युपगमान्न दोष इति वाच्यम्॥ जातिप्रकारकशक्तिग्रहस्य स्वाश्रयीभूतसकलव्यक्तिबोधकत्वेऽप्यनुत्पन्ने जात्याश्रयत्वसम्बन्धस्य वक्तुमशक्यतया भाविव्यक्तेर्जात्याश्रयत्वाभावात् तद्बोधासंभवेन

[1]मृजेर्वृद्धिरि- (पा)

त्यत्र तज्जन्योत्पत्तिज्ञप्त्योः परस्पराश्रय इति भावात्।

[2]वृद्धिरादैजि- (पा)

त्यस्य विद्यमानेषु बुद्धिस्थेषु चारितार्थ्येन भाविनामुद्देश्यत्वासंभ-

---

१ अ७।पा२।सू११३॥ २ अ१।पा१।सू१॥

वेन तच्च वृद्धिपदस्य प्रक्रियाग्रहासंभवाच्च। यद्य"स्य सूत्रस्य शाटकं वये"त्यादाविव भाविसंज्ञाविज्ञानेन सिद्ध्यति। यथाच तत्रोत्पत्त्यनन्तरङ्गृहीतप्रक्रियकशाटकसादृश्याच्छाटकपदप्रक्रियाग्रहस्तथा प्रकृतेऽपि। स्पष्टं चेदम्

[1]इग्यण (पा)

इति सूत्रे भाष्ये। तथाप्यत्र वास्तवमेव परिहारमाह भाष्ये

सिद्धन्विति। (भा)

एतच्च मञ्जूषायां विस्तरेण निरूपितम्।

न्यायेति। (कै)

[2]वक्ष्यमाणन्याय्येत्यर्थः॥

ननु [3]वृद्धिर्यस्येत्यादौ समुदायासंभवात्प्रत्येकमेव संज्ञेत्यत आह

अन्यथेति। (कै)

एवं च तमादाय तत्रापि संभवः। द्वन्द्वनिर्देशात्समुदायस्यैव स्यादिति भावः॥

समुदायेति। (कै)

"मातापित्रोर्दृतेऽहनी"ति वद्बोधे साहित्यं न तु क्रियानिष्पत्तौ इति भावः॥

---

१ इग्यणः सम्प्रसारणम्। अ १। पा १। सू ४५॥

२ वक्ष्यमाणन्यायेनेत्यर्थः॥ क॥

३ वृद्धिर्यस्याचामादिस्तद्वृद्धम्॥ अ १। पा १। सू ७३॥

उभयचेति। (कै)

समुदायेऽवयवेचेत्यर्थः। उभयच तात्पर्याभावे हेतु-

र्युगपदिति। (कै)

फलाभावादिति भावः। यद्यपि पर्यायः प्राप्नोति। तथापि समासविधिनियमोभयपरत्वे गौरवमिति अतो लिङ्गत्वकल्पनमे-वोचितमित्यच तात्पर्यम्॥

भाष्यकारास्त्विति। (कै)

तदेकदेशीत्यर्थः। द्वे इत्यनुवृत्त्यैव सिद्धे उभयग्रहणं महार्थक-मिति भावः॥ न ज्ञापकादेव किन्तु युक्तितोऽपि प्रत्येकं संज्ञेत्याह भाष्ये

प्रत्यवयवमिति। (कै)

प्रत्येकं वाक्यपरिसमाप्तिमुपक्रम्य प्रत्येकं भुजिसमाप्त्युक्तिरयुक्ता न हि भुज्यर्थोऽच[1]वाक्यार्थः किन्तु एजन्तार्थोऽत आह

अचेति। (कै)

वाक्यार्थस्तु अत्र प्रयोजकव्यापारस्तस्य समुदायविषयत्वसंभवात् फलग्रहणम्। तच्च प्रयोज्यव्यापाररूपमित्याह

तच्चेति॥ (कै)

ननु विशिष्टपरिमाणस्यादनीयस्य भोजनक्रिया समुदायपर्याप्ते-त्यपि वक्तुं शक्यमत आह

---

१ भुज्यर्थो वाक्यार्थः। ख॥

तृप्तिफलत्वाच्चेति ॥ (कै)

सर्वापि क्रिया प्रत्येकं समाप्यत इति भ्रमो न कार्य इत्याह

नाध्येति ॥ (कै)

गीतादीति। (कै)

आदिना नृत्तवाद्यादि। अन्वर्थत्वं[2] संयुज्यन्ते वर्णा अत्रेति। लक्ष्यानुसारात् तत्र समुदाये वाक्यपरिसमाप्तेराश्रयणमिति तत्त्वम्। प्रकृतेऽन्यतरन्यायाश्रयणे हेतुमाह

वृद्धिसंज्ञेति ॥ (कै)

लिङ्गादिति। (कै)

"[3]प्रस्थेऽवृद्धमिति" निषेधबाधनार्थं हि तदिति भावः। न च नामधेयरूप[4]मालादीनामाद्युदात्तार्थन्नत्। तस्य वा नामधेयस्येति पक्षे वृद्धत्वादिति वाच्यम्। "अभिव्यक्तेति" न्यायेन तत्राप्रवृत्तेः॥ [5]समुदाये समाप्तौ युक्तिमाह

अत्र शतस्येति। (कै)

एवंचा[6]कथितसूत्रे दण्डिरपि परिगणनीय इति भाव इत्येके॥

---

१ नृत्यवाद्यादि। ख॥ २ अन्वर्थत्वात्। ख॥

३ प्रस्थेऽवृद्धमकर्क्यादीनाम्। अ ६। पा २। सू ८७॥ सिद्धान्तकौमुद्यां समासस्वरप्रकरणे द्रष्टव्यम्॥

४ मालादीनां च। अ ६। पा २। सू ८८॥ वृद्धानाम् आद्युदात्तार्थमिदम्॥

५ समुदाये युक्तिमाह। ख॥

६ अकथितं च। अ १। पा ४। सू ५१॥

उभयचेति। (कै)

समुदायेऽवयवेचेत्यर्थः। उभयत्र तात्पर्याभावे हेतु-

र्युगपदिति। (कै)

फलाभावादिति भावः। यद्यपि पर्यायः प्राप्नोति। तथापि समासविधिनियमोभयपरत्वे गौरवमिति अतो लिङ्गत्वकल्पनमे-वोचितमित्यत्र तात्पर्यम्॥

भाष्यकारास्त्विति। (कै)

तदेकदेशीत्यर्थः। द्वे इत्यनुवृत्त्यैव सिद्धे उभेग्रहणं सहार्थक-मिति भावः॥ न ज्ञापकादेव किन्तु युक्तितोऽपि प्रत्येकं संज्ञेत्याह भाष्ये

प्रत्यवयवमिति। (कै)

प्रत्येकं वाक्यपरिसमाप्तिमुपक्रम्य प्रत्येकं भुजिसमाप्त्युक्तिरयुक्ता न हि भुज्यर्थोऽत्र[1]वाक्यार्थः किन्तु ण्यन्तार्थोऽत आह

अत्रेति। (कै)

वाक्यार्थस्तु अत्र प्रयोजकव्यापारस्यैव समुदायविषयत्वसंभवात् फलग्रहणम्। तच्च प्रयोज्यव्यापाररूपमित्याह

तच्चेति॥ (कै)

ननु विशिष्टपरिमाणस्यादनीयस्य भोजनक्रिया समुदायपर्याप्ते-त्यपि वक्तुं शक्यमत आह

---

१ भुज्यर्थो वाक्यार्थः। ख॥

तृन्निफलत्वाच्चेति ॥ (कै)

सर्वापि क्रिया प्रत्येकं समाप्यत इति भ्रमो न कार्य इत्याह

नाध्येति ॥ (कै)

गीतादीति। (कै)

आदिना नृ[1]त्तवाद्यादि। अन्वर्थत्वं[2] संयुज्यन्ते वर्णा अत्रेति। लक्ष्यानुसारात् तत्र समुदाये वाक्यपरिसमाप्तेराश्रयणमिति तत्त्वम्। प्रकृतेऽन्यतरन्यायाश्रयणे हेतुमाह

वृद्धिसंज्ञेति ॥ (कै)

लिङ्गादिति। (कै)

"[3]प्रस्थेऽवृद्धमिति" निषेधबाधनार्थं हि तदिति भावः। न च नामधेयरूप[4]मालादीनामाद्युदात्तार्थन्तत्। तस्य वा नामधेयस्येति पक्षे वृद्धत्वादिति वाच्यम्। "अभिव्यक्तेति" न्यायेन तत्राप्रवृत्तेः॥ [5]समुदाये समाप्तौ युक्तिमाह

अत्र शतस्येति। (कै)

एवंचा[6]कथितसूत्रे दण्डिरपि परिगणनीय इति भाव इत्येके॥

---

१ नृत्यवाद्यादि। ख॥ २ अन्वर्थत्वात्। ख॥

३ प्रस्थेऽवृद्धमकर्क्यादीनाम्। अ ६। पा २। सू ८७॥ सिद्धान्तकौमुद्यां समासस्वरप्रकरणे द्रष्टव्यम्॥

४ मालादीनां च। अ ६। पा २। सू ८८॥ वृद्धानाम् आद्युदात्तार्थमिदम्॥

५ समुदाये युक्तिमाह। ख॥

६ अकथितं च। अ १। पा ४। सू ५१॥

उद्देश्यत्वरूपमार्थं प्राधान्यं घृतस्येत्यनुद्देश्यत्वेन गर्गा गुणकर्म। दण्डश्च स्वसंप्रदानकदानानुकूलव्यापारानुकूलव्यापारः शासनरूपोऽर्थः । शासनं नियन्त्रणम् । [1]तत्र ण्यन्त इव कर्त्तुरित्युभयोः कर्मत्वम् । कर्तृप्रत्ययसमभिव्याहारे धात्वर्थप्रधानव्यापारविशेषणफलाश्रयत्वेन गर्गाणां शब्दं प्राधान्य[2]न्तत्रैव प्रधाने कर्मणि लकारः ॥

प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम्

इत्युक्तेः ॥ दुहादिष्वस्याप्रामाणिकः पाठ इति वक्ष्यते ।

अपादानस्थानप्राप्ता (कै)

इत्यनेन चानुद्देश्यत्वमात्रमभिप्रेतमिति परे ॥

घृतस्य प्राधान्यमिति । (कै)

शारीराभिहननलक्षणदण्डव्यावर्त्तनेनेति भावः ॥ नन्वन्तरेणापीति वाच्ये सार्वकालिकासत्त्वप्रतिपादकमपि शब्दरहितमयुक्तमत आह

न्यायादिति । (कै)

[3]घृतदण्डनन्यायेत्यर्थः ॥

योगविभागेति । (कै)

तिङन्तसमासायेति भावः ॥ भाष्ये

---

१ ण्यन्त इव । क ॥ इ ॥

२ प्राधान्यात्तत्रैव । क ॥

३ घृतदण्डनन्यायादित्यर्थः । क ॥

किमर्थमिति। (भा)

चतुर्थीतत्पुरुषः ॥

तपरकरणं क्रियते (भा)

इति। पाकं पचतीतिवत्सामान्यविशेषभावेन सह प्रयोगः। [१]आत्वजातेर्भिन्नकालावर्णवृत्तित्वाभावाद् द्वितीयमाश्रयति।

व्यक्तिरिति ॥ (कै)

यद्गुणस्य (कै)

इत्यादि बहुव्रीहिः ॥ भाष्ये

किं च कारणमिति। (भा)

[२]निमित्तकारणहेतुष्विति (वा)

हेतौ प्रथमा ॥

अस्तिप्रयोजनमेतदिति (भा)

काक्वा सूचितमनुग्रयं पृच्छति

किं तर्हीति। (भा)

किं तर्हीति प्रश्ने ॥

इति। (भा)

इदं वक्तव्यमित्यर्थः ॥ तदाह

भेदकत्वादि- (कै)

त्यादि ॥

---

१ अत्वजातेः। इ ॥

२ निमित्तकारणहेतुषु सर्वासां प्रायोदर्शनम्। इति वार्त्तिकेन ॥

जात्यात्मनैकत्वे व्यक्तिभेदादेवोपपत्तेर्न गुणभेदकृतभेदे दृद-मुदाहरणं स्यादत आह

उदकत्वेति ॥ (कै)

[1]आत्मशब्दो द्रव्यवाची भाष्ये ।

[2]वालो युवेति (भा)

भाष्ये

स्वामाख्यां न जहाती- (भा)

त्यनुकर्षः । एतेनाभेदकत्वे प्रत्यभिज्ञा प्रमाणं दर्शितम् ॥ ननु गुणेषू-भयाङ्गीकारे खण्डिकोपाध्यायचपेटादानं विरुध्येतेति चेन्न । यत उभयमिति लोकमात्रविषयमिति न विरोध इत्याह

आम्नायेति ॥ (कै)

ननूभयोरपि न्याय्यत्वप्रतिपादनेन

किं पुनरत्रन्याय्यमिति (भा)

प्रश्नोऽयुक्तोऽत आह

शास्त्रे इति ॥ (कै)

अचेति । (भा)

निर्धारणषष्ठमी नेति भावः ॥

---

१ "एकोऽयमात्मा उदकं नाम" इत्यादिना ॥

२ भाष्ये वालो युवेति । क ॥

[1]इत्येव न्याय्यमिति। (भा)

विधेयाण् भिन्नविषय इति शेषः॥ तच्चैतत्क्तस्यापि अप्रत्यय इति निषेधात्। अतस्त्वयैव ज्ञापकमुपन्यस्यति

यद्ययमिति॥ (भा)

प्रयत्नम्। (कै)

खशब्देनोपादानरूपम्॥

कथमिति। (कै)

यथा बध्नादेशे उदात्तनिपातनेन

[2]एकाच (पा)

इति सूत्रस्थमेकाच् ग्रहणं न कार्यमिति॥

यः स्वरः प्राप्त इति। (कै)

हन्तेरनुदात्तत्वादनुदात्त इत्यर्थः॥ न चैवमस्यादीनामाद्युदात्तत्वेनादेशानङः स्यान्यनुरूपेऽनुदात्त उच्चारणीये उदात्तोच्चारणं विवक्षार्थमिति ज्ञापितेऽपि व्यर्थमुदात्तग्रहणमिति वाच्यम्। परमास्थिशब्दादावन्तोदात्ते उदात्तगुणकस्यापि स्थानिवेन विवक्षायां मानाभावादित्याशयात्॥ नन्वेवमपि चतसर्य्याद्युदात्तनिपातनसामर्थ्याच्चतस्र इत्यत्र

[3]चतुरः शसी- (पा)

त्यस्याप्रवृत्तिरिति भाष्योक्तमनुपपन्नम्। चतुः शब्दस्य

---

१ इत्येवं न्याय्यमिति। क॥ २ अ ७। पा २। सू १०॥

३ चतुरः शसि। अ ६। पा १। सू १६७ अन्तोदात्तविधायकमिदम्॥

[1]न्नः संख्याया (पा)

इत्याद्युदात्ततया तत्स्थानिक चतसरि स्थानिस्वरेणाद्युदात्तोच्चारणोपपत्या

चतुरः शसी- (पा)

त्येतद्बाधकत्वायोगादत आह

अन्ये त्विति ॥ (कै)

एकश्रुतिश्च

[2]विभाषा च्छन्दसीति (पा)

वैकल्पिकी। तत्पाठे क्वचिदुदात्तोच्चारणं विवक्षार्थम् । वैस्वर्येण पाठमभिप्रेत्य प्रकृतसूत्रस्थं ज्ञापकमित्यविरोधः ।

अन्येतु (कै)

इत्यरुचिबीजन्तु निपातनं नामान्यादृशे प्रयोगे प्राप्तेऽन्यादृशप्रयोगकरणम् । तद्रूपा[3]द्यत्नात्तचतचोदात्तादिविवक्षा ।

[4]तिसृचतसृ (पा)

इत्यत्रापि [5]द्वन्द्वप्रयुक्तान्तोदात्ते उच्चारणीये आद्युदात्तोच्चारणं

---

१ न्नः संख्यायाः । आद्युदात्तार्थमिदं फिट् सूत्रम् । पा २ । सू ५ ॥
२ विभाषा छन्दसि । अ १ पा २ । सू ३६ ॥ एकश्रुतिविधायकमिदम् ॥
३ यत्नात् तचोदात्तादिविवक्षा । क ॥
४ त्रिचतुरोः स्त्रियां तिसृचतसृ । अ ७ । पा २ । सू ९९ ॥
५ द्वन्द्वप्रयुक्तोऽन्तोदात्ते । क । ख । ङ ॥

विवक्षार्थम्। सम्पूर्णाष्टाध्यायी आचार्येणैकश्रुत्या पठितेत्यत्र न मानम्। क्वचित्कस्यचित्पदस्यैकश्रुत्या पाठो यथा

[1]दाण्डिनायनादि- (पा)

सूत्रे ऐच्छाकेति [2]एतावदेव भाष्यान्नभ्यते। यद्यप्यध्येतार एकश्रुत्यैवाङ्गानि पठन्ति ब्राह्मणवत्तथापि व्याख्यानतोऽनुनासिकत्वादिवदुदात्तनिपातनादिज्ञानमित्याहुः॥

स्वरितादेरिति। (भा)

भाष्ये उपलक्षणम्। उदात्तादेरन्तानुदात्ताच्च प्राप्नोतीत्यपि बोध्यम्॥

आश्रीयमाण इति। (भा)

शब्देन निपातनेन वाऽऽश्रीयमाण इत्यर्थः। नन्वेवमनुदात्तादिग्रहणं व्यर्थं स्यादत आह

अजिति॥ (कै)

ऐजर्थन्तपरत्वमित्याह

इदं तर्हीति (भा)

भाष्ये। चतुर्मात्रोऽपि प्लुतः

[3]प्लुतावैच (पा)

इति सूत्रे भाष्ये स्पष्टः॥ कार्यकालमाश्रित्य नोद्यति।

---

१ अ ६। पा ४। सू १७४॥

२ एतदेव च भाष्यान्नभ्यते। क॥

३ प्लुतावैच इदुतौ। अ ८। पा २। सू १०६॥

नन्विति। (भा)

अयं भावः। तत्पक्षे

[1]मृजेर्वृद्धिरि- (पा)

त्यादौ उपस्थितं

वृद्धिरादैजिति (पा)

पदैकवाक्यतयान्वेति। एकं वृद्धिपदं तु प्रत्यभिज्ञामात्रफलकमनुवाद एव। एवं च भाव्यमानत्वं स्पष्टमेवेति। उत्तरस्य त्वयं भावः। [2]अनुवादकल्पनापेक्षया [3]तत्रोपस्थितं

वृद्धिरादैजिति (पा)

तत्रैव शक्तिग्रहं सम्पाद्य वाक्यभेदेन

मृजेर्वृद्धिरित्य- (पा)

स्यार्थं बोधयति॥ "ज्योतिष्टोमेन यजेते"त्यादौ तु शक्तिग्राहकशास्त्रान्तराभावादगत्या विधावेव सामानाधिकरण्यान्नामधेयत्वावगतिः कल्प्यते। न तु विद्यमाने शक्तिग्राहके तथा कल्पनमुचितं पदस्यानु[4]वादत्वकल्पनं चेति॥ यत्तु कार्यकालपक्षे वृद्धिरादैच्

---

१ अ ७। पा २। सू ११४॥

२ अनुवादत्वकल्पनापेक्षया। क। ख। ग। इ॥

३ यत्रोपस्थितम्। क॥

४ अनुवादकत्वकल्पनम्। क। इ॥ 'पदस्यानुवादत्वकल्पनं चेति' इति ख पुस्तके नास्ति॥

वृद्धिरादैजि- (पा)

इत्यादेर्यत्र वृद्धिपदं तत्रादैजित्युपतिष्ठत इत्यर्थः॥ यथा च ज्योतिष्टोमादिपदानां यागविधावेव सामानाधिकरण्यान्नामधेयत्वावगतिस्तथेहापि "सृजेर्वृद्धिरि"त्यादौ सामानाधिकरण्यान्नामधेयत्वावगतिः। उपस्थापकेन वृद्ध्यादिपदेन उपस्थाप्यस्य वृत्त्या बोधनात् परं संज्ञासूत्रत्वावगतिरिति[1]। तन्न।

[2]कार्यकालं संज्ञापरिभाषं
भस्येत्युपस्थितमिदं भवति।

[3]यचिभमि- (पा)

तीति।

[4]ष्यङः संप्रसारणमिति (पा)

[5]सूत्रस्य भाष्येण

कार्यकालं संज्ञापरिभाषं
प्रगृह्यः प्रकृत्येत्युपस्थितमिदं भवति॥

[6]ईदूदेद् द्विवचनं प्रगृह्यमिति[7] (पा)

---

१ संज्ञासूत्रत्वावगतिरिति चेन्न। क॥
२ स्पष्टार्थेयं परिभाषेन्दुशेखरे॥
३ अ १। पा ४। सू १८॥
४ अ ६। पा १। सू १३॥
५ सूत्र भाष्येण। क॥
६ अ १। पा १। सू ११॥ ७ ईदूदेदितिसूत्रस्य –। सम्॥

[1]अदसो मादिति (पा)

सूत्रस्थभाष्येण च विरोधात्। लद्रीत्या ह्युपस्थितमिदं भवति [2]यचीतीत्येव वक्तव्यं स्यात्॥ [3]"अथ संज्ञे"त्यादिप्रकृतसूत्रस्थवार्त्तिक-विरोधश्च। प्रकारान्तरेणाचत्य तत्प्रत्याख्यानपरभाष्यविरोधश्च। किञ्च

मृजेर्वृद्धिरि- (पा)

त्यादिसूत्रस्थवृद्ध्यादिपदानां तदुपस्थितिसम्पत्या चारितार्थ्येन स्वोप-स्थापितपदार्थैऽन्वये मानाभावात् "तच्चेक्परिभाषा"नुपस्थित्यापत्तिः। वृद्धिपदेनाविधानात्। "मृजेर्वृद्धिरि"त्यादौ इक्पदोपस्थापकस्यापि विधेयाकाङ्क्षासत्त्वात् विधिविषये एव तत्प्रवृत्तेश्च भवत्येवान्वयः। [4]एवं च ज्योतिष्टोमवाक्यादैलचष्णेनाच नामधेयता दुरुपपादा। किं चोपस्थाप्यार्थस्य वृत्त्या बोधनात् संज्ञासूत्रत्वं वा "इकोगुणे"त्यादि-वदुपस्थापकत्वात्परिभाषात्वं वेत्यत्र विनिगमकाभावः। वृद्ध्यादिपदै-र्वृत्त्या बोधनञ्च दुरुपपादम्। अनुवादेऽपि संज्ञासूत्रोपस्थितिः

[5]अणोऽप्रगृह्यस्य (पा)

---

१ अ १। पा १। सू १२॥ अदसो मादिति नास्ति। सम्॥

२ पचतीत्येव। क॥

३ भाष्ये उक्तमत्रैव॥

४ एवं ज्योतिष्टोमवाक्यात्। क॥

५ अ ८। पा ४। सू ५७॥

[1]वृद्धिर्यस्ये- (पा)

त्यादिविषये भाष्ये स्पष्टेति दिक्। भाष्ये

किं तकार इति। (भा)

अस्य तादपि परस्परं इत्यनङ्गीकुर्वत इति शेषः॥

सम्बन्धाभावादिति। (कै)

शेषशेषिभावाभावादित्यर्थः॥ तान्तस्य पदत्वाभावे जश्त्वं न स्यादिति भावः। आनुषङ्गिकं फलं दर्शयति

ज्ञापकद्वारेणेति॥ (कै)

---

१ अ १। पा १। सू ७३॥

इको गुणवृद्धी।१।१।३॥



गुणवृद्धिग्रहणोत्तरत्र निषेधसमर्पणायावश्यकत्वेऽपि इक् पद-स्थेकः स्थान इत्यर्थार्थमावश्यकत्वेऽपि योगविभागविषयकोऽयं प्रश्नो भाष्ये

इग्ग्रहणमिति ॥ (भा)

ननु इग् ग्रहणेनाकारादीनां निवृत्तिरग्रक्या कर्त्तुमत आह

स्थानित्वस्येति ॥ (कै)

ननु आकारस्य वृद्ध्युदाहरणादाने गुणांशे च अकारोदाहरणा-दाने किं बीजमत आह

आकारस्येति ॥ (कै)

वृद्धिविधौ। (कै)

सिचि वृद्धिविधौ अयासीदित्यादौ। अपवादत्वात् सगिड्भ्यां सा बाध्यते इति भावः॥ इतरवृद्धिविधौ सम्भवेऽप्याह

विशेषाभावादिति ॥ (कै)

अकारस्येति। (कै)

[1]ण्यक्षोपावितिः (वा)

पूर्वविप्रतिषेधेनातो लोपस्य वृद्धिगुणबाधकत्वादिति भावः। पुत्रीयतीत्यादौ त्वविशेष इति बोध्यम्॥

आकारस्य गुणः। (भा)

[2]सार्वधातुकार्द्धधातुकयो- (पा)

रित्यनेन॥ नन्वैकारोच्चारणसामर्थ्याद् गुणे नेत्यत आह

एचामिति। (कै)

सर्वेषां विवृत एव प्रयत्न इत्यभिमानः॥

आर्द्धधातुकोपदेश इति। (कै)

गुणनिष्पन्नश्च तदुत्तरकालिक इति भावः॥

[3]प्रतिपत्ति लाघवम्। (कै)

प्रक्रियालाघवम्।

"तेभ्योऽपि विवृतावेङौ ताभ्यामैचौ तथैव च"

इति पाणिनीयग्रिचोक्तेः प्रयत्नलाघवमपि बोध्यम्।

इग् ग्रहणेति। (कै)

ततश्च

---

१ "ण्यक्षोपावियङ्यणगुणवृद्विदीर्घेभ्यः पूर्वविप्रतिषेधेन"। अतो लोपः (अ ६। पा ४। सू ४८) इति सूत्रस्यवार्त्तिकम्॥

२ अ ७। पा ३। सू ८४॥

३ प्रतिपत्तिलाघवार्थमित्यस्ति॥

[१]मिदेरिति (पा)

नावयवषष्ठी किन्तु स्थानषष्ठीति सर्वादेशो गुणः स्यादित्यर्थः। भाष्ये

नैतानि सन्ति ज्ञापकानीति। (भा)

क्वचिन्न्यायेन। "ननु नैतानि सन्ति ज्ञापकानि" इति प्रतिज्ञायाग्रे ज्ञापकसमर्थनमयुक्तमत आह

विशेषेति॥ (कै)

टकः कित्त्वं ज्ञापकं यं विधिं प्रतीत्यादिविशेषप्रतिपादनायेत्यर्थः॥ शङ्कते

केचिदिति॥ (कै)

यदप्युच्यते इति। (कै)

समुच्चयार्थापिशब्देनेतिशेषः॥

आर्थेन। (कै)

सामर्थ्यप्राप्तेन। [२]भङ्गस्य भङ्गसदृश इति भावः॥

[३]ग्लायत इत्यादीति। (कै)

आदिना जग्लावित्यादि॥ नन्वेवमात्त्वमपि बाध्येत नहि तस्यैकारो निमित्तं ग्ले इति पाठेऽपि सुकरत्वाद् अत आह

---

१ अ ७।पा ३।सू ८२॥

२ भङ्गस्य भङ्गः सदृश इति भावः। क।ग।इ॥

३ ग्लायत इति। इ।ख।ग॥

[1]न ध्याख्येति। (कै)

[2]ध्या इति क्तात्त्वनिर्देशेनैकारोच्चारणस्यात्त्वाबाधकत्वज्ञापनादिति भावः॥ न चास्य सौचत्वम्। बाधकत्वमङ्गीकृत्य सौचत्वकल्पनापेक्षयाऽबाधकत्वज्ञापनस्य लघुत्वादित्याहुः॥ न च रैग्शब्दादिभ्य आचारक्विपि रायतीत्यादौ संध्यक्षरस्य गुणः स्यादिति वाच्यम्। एजन्तेभ्य आचारक्विवभाव एतद् [3]भाष्यप्रामाण्यादित्यदोषात्॥

गुणवदिति। (कै)

वैधर्म्ये दृष्टान्तः॥ ननु परूपेऽपि गुणानामभेदकतया कदाचित्सानुनासिकोऽपिस्यादत आह

रूपग्रहणस्येति॥ (कै)

परे तु अत्र परूपशब्देन परशब्देन वा यदुपस्थितं रूपं प्रयोगस्थं तस्य ग्रहणम्। स्थाने जायमानः किं गुणक इत्याकाङ्क्षायामन्तरतमपरिभाषयोभयगुणकः। प्रकृते चोभयान्तरतमासम्भवात् परशब्देन यद्गुणकस्योपस्थितिस्तद्गुणक एव भविष्यतीति भाष्याशयाद्रूपग्रहणस्येत्यादि चिन्त्यम्। गुणानां शब्दत्वादिवत् शब्दरूपत्वाभावेन व्यावृत्त्यसम्भवश्च रूपग्रहणेनेत्याहुः॥

ननु

गमेरप्ययं ड इति (भा)

भाष्यमनुपपन्नं गमो गमश्च

---

१ न ध्याख्ये इति। क॥ २ "ध्या इति" इति नास्ति। क॥
३ भाष्यकारप्रामाण्यात्। क॥

[1]अन्तात्यन्ताध्वदूरपारेति (पा)

सूत्रे पठितेन

[2]अन्यत्रापि दृश्यत इति (वा)

वार्त्तिकेन नगोऽग इत्यादौ ङस्य सत्त्वादत आह

सप्तम्यामिति । (कै)

[3]सप्तम्यां जनेर्- (पा)

त्युत्तरं पठिते

[4]अन्येष्वपि दृश्यते (पा)

इति सूत्रे दृग्ग्रिग्रहणस्य सर्वोपाधिव्यभिचारार्थत्वेन[5] तेनैव प्रकृत्यन्तरादपि ङे सिद्धे "अन्तात्यन्तेति" प्रकरणस्थं वार्त्तिकं न कार्यमिति भावः ॥ भाष्ये

आन्तर्यत आकार इति । (भा)

स्थानत आन्तर्यादिति भावः ॥ ननु

[6]तनोतेर्डउः सन्वच्चेति

डित्करणान्

---

१ अन्तात्यन्ताध्वदूरपारसर्वानन्तेषु ङः । अ ३ । पा २ । सू ४८ ॥

२ अन्यत्रापि दृश्यत इति वक्तव्यम् । वा ॥

३ अ ३ । पा २ । सू ९७ ॥

४ अ ३ । पा २ । सू १०१ ॥

५ व्यभिचारार्थत्वेनैव । क ॥

६ "तनोतेर्डउः सन्वच्च" । सू ७३० ॥ उणादिसूत्रम् ॥

[1]न व्यञ्जनस्य गुण (भा)

इति चेन्न॥ उणादिनामव्युत्पत्तिपक्षाङ्गीकारात्॥ न चैवमपि स्थानप्रयत्नान्तरतमेषु इकारादिषु चरितार्थानि गुणादिशास्त्राणि व्यञ्जने न [2]प्रवर्त्तन्ते इति वाच्यम्। ईग्रादौ ग्रकारे तथाप्यतिप्रसङ्गात्। सूचमते स्थानप्रयत्नैक्यादिति भाष्याशयः॥ [3]"स्थानेऽन्तरतमे" इति षष्ठ्यन्तपाठस्य भाष्ये [4]प्रत्याख्यानेनास्या युक्तेरसम्भव-[5]दुक्तिकत्वाच्च॥ भाष्ये

एतेऽपीति॥ (भा)

औकारादयः। एषु उदाहरणेष्विकः

प्राप्नुवन्ती- (भा)

त्यन्वयः॥

स (भा)

इत्यत्र तु न स्यादेवेति भावः॥

[6]त्यदादीनाम (पा)

इत्यत्र "त्यदादीनामि"ति तु

---

१ एतत् सूत्रस्थभाष्यम्॥
२ प्रवर्त्तते। क॥
३ "स्थानेऽन्तरतम" इति सूत्रे। अ १। पा १। सू ५०॥
४ प्रत्याख्यातत्वेनास्याः। क॥
५ उक्तित्वाच्च। ख॥
६ अ ७। पा २। सू १०२

[1]तदोः सः सावि- (पा)

त्युत्तरार्थं स्यात् । संज्ञोपसर्जनव्यावृत्त्यर्थं च स्यादिति बोध्यम् ॥

आश्रितेति । (कै)

आश्रितो गुणवृद्धिशब्दव्यापार उच्चारणं येषु आदैचु विधीयमानेषु तदर्थमित्यर्थः ॥

तेनेति । (कै)

दत्येवमित्यध्याहृत्य स्वरूपपदार्थकेनान्यतरेण विशेषणादीदृग्रार्थलाभ इति भावः ॥ अत एव सम्बन्धानुवृत्तिप्रदर्शनपरभाष्ये गुणवृद्धी दत्युच्चार्य

गुणवृद्धिग्रहणमनुवर्त्तत (भा)

दत्युक्तम् । उपक्रमस्थगुणवृद्धिग्रहणसामर्थ्यादित्येतद्भाष्यस्वारस्यादाह

अथवेति । (कै)

पुनरुपादानसामर्थ्यादिहत्यं [2]गुणवृद्धिग्रहणं गुणवृद्धिशब्दविहितगुणवृद्धिलाक्षणिकमिति भावः ॥

यादृग् इति ॥ (कै)

स्वरूपपदार्थक दत्यर्थः ॥ नन्वेवं सति उत्तरत्र निषेधसमर्पणार्थं गुणवृद्धिग्रहणस्य चारितार्थ्येन सामर्थ्यं दुरुपपादम् । अनुवर्त्त-

---

१ अ ७ । पा २ । सू १०६ ॥

२ इह गुणवृद्धि - - । क ॥ इहत्य गुणवृद्धिग्रहणम् । ख ॥

मानस्य स्वरूपपरत्वेन निषेध्यसमर्पकत्वाभावादिति चेन्न। "आगन्तू-नामन्ते निवेश" इति न्यायेन

[1]अदेङ् (पा)

सूत्रे गुणपदोत्तरं वृद्धिपदोपस्थित्या तत्साहचर्येण तत्र सूत्रे स्वरूप-परत्वं तस्य। उत्तरत्र तु योग्यतयाऽर्थपरत्वम्।

[2]इक इति (पा)

सूत्रेऽपि

न धात्वि- (पा)

त्यादिसाहचर्येणार्थपरत्वम्। 'इक इति' षष्ठीनिर्देशाच्चेति भाष्या-शयात्॥

नपुंसकस्येति॥ (कै)

[3]"घञजपः पुंसीति" तु प्रायिकमिति भावः। यत्तु भाव-विषयमेवैतदिति। तन्न। मांसं भक्ष्योऽस्येति

[4]कर्मण्यणिति (पा)

सूत्रस्थभाष्यप्रयोगविरोधात्॥

तेनेति। (कै)

अत्रादैजित्यनुवृत्तिर्न स्वकार्याय किं तु वृद्धिशब्दस्यान्य-सम्बन्धनिवृत्तये इति भावः॥ भाष्ये

---

१ अ १। पा १। सू २॥ २ अ १। पा १। सू ३॥
३ घञजपाःपुंसि। इ। क॥ ४ अ ३। पा २। सू १॥

[1]वृद्धिरादैच् अदेङ्गुण[2] (भा)

इति सूत्रक्रमनिर्देशः । पुनर्वृद्धिरादैजित्यभिधानमदेङ् इत्यत्र सम्बन्धानुवृत्तिं दर्शयितुम् । "इको गुणवृद्धी" इत्युक्तिस्तु यथा न्यासाभिप्रायेण ॥

[3]आदैजदेङ्ग्रहणमिति । (भा)

स्वरितत्वाप्रतिज्ञानेनादेङ्ग्रहणवदादैजित्यपि निवृत्तमित्यर्थः । क्वचित्तु आदैज्ग्रहणं निवृत्तमित्येवपाठः ॥ ननु मण्डूकस्य चेतनत्वात्तथा गतिसम्भवेऽपि शब्दस्य कथं सेत्यत आह

वृद्धिशब्दस्येति ॥ (कै)

स्वरितत्वासङ्गाद् अनुवर्त्तमानस्यापीतिशेषः ॥

इहेति । (कै)

इक इति (कै)

सूत्रे इत्यर्थः ॥ "अदेङि"त्यत्र तु न सम्बन्धः । गुणसंज्ञासम्बन्धेनादेङां निराकाङ्क्षत्वादितिबोध्यम् ॥ नन्वेकयोगत्वं नैकार्थत्वं भिन्नविषयसंज्ञाद्वयविधानात् । नापि निरन्तरपाठः । तस्येदानीमपि सत्त्वेन करिष्यत इत्यस्यासङ्गतेः ।

---

१ अ १ । पा १ । सू १ ॥
२ अ १ । पा १ । सू २ ॥
३ आदैज् ग्रहणमिति । ख ॥

[1]णेरणावि- (पा)

त्यादौ एकयोगेऽप्यनुवृत्तिदर्शनाच्चात आह

एक इति ॥ (कै)

प्रतिपत्तिकाले। (कै)

लक्ष्यसंस्कारकवाक्योपस्थकाले ॥

एककालेति। (कै)

आदेज्वृद्धिसंज्ञोऽदेङ्गुणसंज्ञो भवतीति सङ्ग्राहकवाक्यार्थबोध एककाल इति भावः ॥ समूहालम्बनात्मक एकवाक्यार्थबोध इति तात्पर्यम्। यद्वादेज् वृद्धिसंज्ञोऽदेङ्गुणसंज्ञश्चभवत इत्येको वाक्यार्थबोध इति तात्पर्यम्[2]।

[3]णेरणावि- (पा)

त्यादौ अवान्तरवाक्यार्थभेदान्नदोषः ॥ केचित्तु एककाला प्रतिपत्तिर्भवतु तावतापि स्वरितत्वगुणप्राप्तवृद्धिपदसंबन्धाभावः कुत इति चिन्त्यम्। न च स्वविषयवाक्यजबोधानन्तरं निराकाङ्क्षतयान्यत्रान्वयाप्राप्तौ हि तत्प्राप्तये स्वरितासङ्गो नह्येतदेकयोग इति वाच्यम्। व्यवधाननिबन्धनायामनेकसम्बन्धाप्रापावनेकसम्बन्धाय स्वरितत्वासङ्ग इत्यस्यापि वक्तुं शक्यत्वात्। तस्मादयमत्र भाष्यार्थः

---

१ णेरणौ यत्कर्म णौ चेत् सकर्तानाध्याने ॥ अ १। पा ३। सू ६७ ॥

२ प्रतिपत्तिः वाक्यार्थबोधः। इत्यधिकम् ॥ क ॥ ख। ङ ॥

३ अ १। पा ३। सू ६७ ॥

[1]तद्धीते तद्वेद- (पा)

त्यत्र द्विस्तद्ग्रहणादेकयोगेऽनुवृत्त्यभाव इति । स्पष्टं चेदं

[2]तदस्मिन्नस्तीति (पा)

सूत्रे भाष्ये ॥ एकयोगत्वं च द्वयोः संहिता पाठ एव । वस्तुत एकयोगेऽप्यनुवृत्तिर्भवति ।

[3]तदस्यास्त्यस्मिनिति (पा)

सूत्रे द्विस्तद् ग्रहणाभावात् ।

तद्धीत (पा)

इति सूत्रे तु बालानां सुखबोधाय द्विस्तद्ग्रहणमित्युक्तं[4] तत्रैवातोऽत्र भाष्येऽयं समाधिरेकदेशिन इत्याहुः ॥ ननु वृद्धिगुणसंज्ञयोः सामान्यविशेषत्वाभावात् कथमुत्सर्गापवादभाव्यमत आह

यथेति । (कै)

अत इत्युपादानादेव तद्विषये कस्यासन्दिग्धत्वम् । अत एव तदतिरिक्तावकाशविरहः । तदुद्देशेनैव प्रवृत्तिरूपं तात्पर्यं च । ननु गुणसंज्ञया वृद्धिसंज्ञावत्कृत्यादिसंज्ञयापि प्रत्ययसंज्ञा बाध्येतेत्यत आह

---

१ अ ४ । पा २ । सू ५६ ॥

२ तदस्मिन्नस्तीति देशे तन्नाम्नि । अ ४ । पा २ । सू ६७ ॥

३ तदस्यास्त्यस्मिन्निति मतुप् । अ ५ । पा २ । सू ९४ ॥

४ इत्युक्तम् । क ॥

प्रत्ययेति ॥ (कै)

न तव्याद्याकाङ्क्षया [1]प्रत्ययसंज्ञायाः सम्बन्धो येन सन्निहित-कृत्यादिसंज्ञया निराकाङ्क्षत्वान्नप्रत्ययसंज्ञया[2] सम्बन्धः स्यात्। किन्तु संज्ञाकाङ्क्षया। सा हि स्वस्य बहुविषयत्वलाभाय कतिपयानन्तर-विषयलाभेऽपि पुनः पुनर्विषयान्तरमाकाङ्क्षते। बहुविषयत्वं चास्याः संज्ञिविशेषासम्बन्धेनाधिकारकरणादवसीयत इति भावः॥ प्रकृते तु न तथेति बोध्यम्॥

खञोऽप्राप्ताविति। (कै)

यता मुक्ते इति[3] शेषः। मण्डूकगतयोऽधिकारा इत्यस्यैव स्वरित-लिङ्गेनानुवर्त्तमानं यच्चाकाङ्क्षा तत्रैव सम्बध्यते इति विशेषमभि-धातुमयं पक्षः॥ स च सम्बन्धाय तत्र विभाषाग्रहणरूपं यत्नविशेषं कुर्वतः सूत्रकृतोऽप्यभिमतः॥ अस्य विशेषस्य प्रागकथनं तु एतद्वि-शेषद्वारा पुनस्तत्परामर्शेन तत्रैव परिहारे मुख्यताबोधनायेति बोध्यम्।

इह त्विति॥ (कै)

अकर्त्तव्यत्वविशिष्टं पुनर्गुणवृद्धिग्रहणं यत्न इत्यर्थः॥ अनुवृत्तौ हि तदकर्त्तव्यं भवतीत्याशयः॥ भाष्ये

---

१ प्रत्ययसंज्ञया। क। ङ॥ २ प्रत्ययसंज्ञा॥ क॥
३ विशेषः। ख॥

उभयं निवृत्तमिति। (भा)

स्वरितलिङ्गानाषङ्गेनाननुवृत्तिरेव निवृत्तिरित्यर्थः॥

अपेक्षेति। (कै)

इक इत्येतावन्मात्रस्येतराकाङ्क्षत्वात्समुदायापेक्षायां च लक्ष्यानुसार एव बीजम्। "अनन्तरस्येति" न्यायेन गुणस्यैवापेक्षा युक्तेत्येतन्नास्तीत्यन्वयः॥ समुदायत्वं च युगपद्वृद्धौ सन्निधानात् क्रमेणासन्निधानाच्चेति बोध्यम्॥

षष्ठीति। (कै)

स्थानषष्ठीत्यर्थः।

[1]षष्ठी स्थान इति (पा)

परिभाषया तत्त्वनिर्णयः। अस्य च सूत्रस्य गुणवृद्धिशब्दाभ्यां विधीयमानौ वृद्धिगुणादिकः स्थाने इत्यर्थेऽवान्तरवाक्यार्थबोधोत्तरमेव प्रवृत्तेरुभयोरपि समकालप्रवृत्तिकता बोध्या।

गुणश्रुत्ये- (कै)

त्यस्य गुणशब्देन विधेयत्वबोधिकयेत्यर्थः॥

तच्च यदीति। (कै)

बुद्धेः क्रमिकत्वाद्विशेषणविशेष्यभावे कामचाराच्चेति भावः॥

---

१ षष्ठी स्थानेयोगा। अ १। पा १। सू ४९॥

[1]सोऽस्येति। (कै)

दृगन्तस्येति षष्ठ्याः तेनान्त्येऽल्य[2]नुसंहारादेतद्विशेषणत्वमेतत्परिच्छेदकत्वं तस्येति भावः॥

तदा तस्यायं विशेषणत्वादिति। (कै)

तच्छेषशब्दे तन्त्रेण बहुव्रीहिषष्ठीतत्पुरुषाविति भावः॥ भाष्ये

इको गुणवृद्धीति (भा)

पूर्वपरान्वयि तेनैतद्वयलाभ इति भावः॥ परिच्छेद्यपरिच्छेदकभावश्चत एव च शेषशेषित्वव्यवहार इति बोध्यम्॥

अथ त्विति। (कै)

अवान्तरवाक्यार्थबोधकालेऽनिर्णीतार्थकत्वेन स्थानषष्ठीत्वसम्भावनया तत्प्रवृत्तावपि पञ्चादिक इत्यस्योपस्थितौ

[3]मिदेर्- (पा)

त्यादौ योग्यत्वेन तत्साहचर्येण चान्यत्राप्यवयवषष्ठीत्वनिर्णये तदसम्बन्ध इति भावः॥

बाधायोगादिति। (कै)

आत्यन्तिकबाधायोगादित्यर्थः॥ पाचिकस्तु बाधः "षोऽग्नौ"-ग्रहणादौ भवत्येवेति बोध्यम्॥

---

१ सोऽस्येत्यारभ्य इति भाव इत्यन्तं नास्ति ख पुस्तके॥

२ अल्युपसंहारात्। क॥

३ मिदेर्गुणः। अ ७। पा ३। सू ८२॥

समुच्चय इति । (कै)

[1]मिदेरन्त्यस्येकस्येत्येवमाकारः ॥

नहीति । (कै)

प्रत्यर्थं शब्दनिवेशेनैकस्य [2]नानेकाभिधायकत्वम् । तन्त्रे आवृत्तौ च न मानमिति भावः ॥

अनेकयोगेति । (कै)

एवं च

एकं वाक्यमिति (भा)

भाष्यमयुक्तमिति भावः ॥ उत्तरम् ।

एकस्मिन्नित्यादि ॥ (कै)

[3]अङ्गाङ्गिभावश्च न गुणगुणि भाव इत्याह

विशेषणेति ॥ (कै)

इकः स्थानित्वादिति । (कै)

सार्च न

[4]अलोऽन्त्य- (पा)

सूत्रप्रवृत्तौ निमित्तम् । अल्समुदायोत्तरस्थानषष्ठीत्वाभावात् ।

---

१ मिदेरन्तस्येक इत्येवमाकारः । ख ॥

२ नानैकाभिधायकत्वम् । क ॥

३ अङ्गाङ्गिभावे न गुणगुणिभाव इत्याह । इ । अङ्गाङ्गिभावश्च गुण-गुणिभाव इत्याह । क । ख ॥

४ अलोऽन्त्यस्य । अ १ । पा १ । सू ५२ ॥

अङ्गस्येति (कै)

च न स्थानषष्ठीति भावः ॥

तद्विशेषणत्वादिति। (कै)

अवयवित्वेन विशेषणत्वादित्यर्थः ॥

नानावाक्यत्वमिति। (कै)

अत्र पक्षे

[1]पुगन्ते- (पा)

त्यादि नियमार्थमिति बोध्यम् ॥

मिदादीनामिति। (कै)

गुणादिविधौ परिभाषाद्वयस्य परस्परसम्बन्धापरित्यागेनोपस्थानन्तच्छेषत्वं तच्चैकस्या असम्भवे द्वितीयापि न प्रवर्त्तते इति भावः ॥ भाष्ये

[2]अनन्त्यत्वादिति। (भा)

तच्छेषपक्षेऽनन्त्यत्वादिको गुणो न प्राप्नोतीत्यर्थः ॥

अङ्गस्येति च स्थानषष्ठीति। (भा)

अङ्गस्य स्थाने गुणो भवति स च यत्रान्त्य इक् तत्रान्त्यस्येक इत्यर्थ इत्यभिमानः। तदाह

---

१ पुगन्तलघूपधस्य च। अ ७। पा ३। सू ८६ ॥

२ अनन्त्यत्वाद्धीति। क। ख। ग। इ ॥

भेदेनेति। (कै)

शास्त्रस्य वक्तृविषयत्वायेत्यर्थः ॥

तत्रेगन्तेष्वेवेति। (कै)

तच्छेषत्वादिति भावः ॥

अन्यच्च। (कै)

अनिगन्तविषये गुणशास्त्रे ॥

अन्त्यमलमिति। (कै)

दृक्परिभाषाशेषभूतालोऽन्त्यपरिभाषयेत्यर्थः ॥

अङ्गस्येत्यपि स्थानषष्ठीति (भा)

भाष्ये

अन्त्यमिकमुपसंक्रान्ते- (भा)

त्यनुकर्षः। एवं च सङ्गाद्दकवाक्यस्थेगन्तमात्रविषयत्वादनिगन्तविषय-कलक्षणाभाव एव। आवृत्तौ च न मानमितिभावः। अत एव

[1]गापोष्टकः (पा)

कित्त्वं सार्थकम् ॥

हिश्च (भा)

हेत्यर्थ इत्याह

---

१ अ २। पा २। सू ८॥

मिदादिष्विति ॥ (कै)

अनन्त्यस्य चेक इति । (कै)

यद्यपि "जुसि च"[1] इत्यादीनां प्रधानभूतेष्विशेषणत्वे

तस्मिन्निति[2] (पा)

परिभाषया व्यवहितस्येको न भविष्यति तथापि प्रत्ययस्याङ्गांशे उत्थिताकाङ्क्षतया[3]

जुसि चे- (पा)

त्यादिभिरप्यङ्गमेव विशेष्यते इत्यभिप्रायः ॥

समानन्यायेति । (कै)

गुणप्रकरणावैरूप्याय सर्वचाङ्गस्येत्यवयवषष्ठ्येव स्यादितिभावः ॥

निर्दिष्टेति । (कै)

अनियमे नियमकारिणीत्वात्परिभाषाया इति भावः ॥

अन्ये त्विति । (कै)

अयम्भावः । "नह्यनियम" इति श्रुतिः स्मृतिर्वा किन्तु परिभाषा लिङ्गवती फलवती चेति नियमः ॥ फलं चेतरव्यावृत्तिवदितरसङ्गृह्योऽपीति हृस्वस्येत्यस्याङ्गविशेषणत्वव्यावर्त्तनेनावयवषष्ठीत्वबोधनेनानन्त्यस्यापि गुणसम्पादनमेव फलं स्यात् । अकारे तु गुणागुणयोर्न विशेष इति । तदेतदुच्यति

---

१ अ ७। पा ३। सू ८३ ॥ २ अ १। पा १। सू ६६ ॥
३ उपस्थिताकाङ्क्षतया । क ॥

अनन्त्यस्याप्युकारस्येति ॥ (कै)

नन्वेवं ह्रस्वग्रहणं व्यर्थमत आह

दीर्घस्येति। (कै)

घिसंज्ञावर्णयोरेवेति पक्षे ङिति गुणस्याग्निचिते[१] इत्यादौ प्रसङ्गो बोध्यः ॥

पुनः श्रुतिः। (कै)

पुनर्गुणविधानम् ॥

ननु चेति। (कै)

बहुव्रीहिः समासः सामर्थ्यादिक्परिभाषानुपस्थितिश्चेति भावः॥ "भिदो" दकारोच्चारणं तु [२]भिन्नो भिक्तमित्यादौ चरितार्थम् ॥ "क्ङोः" किच्चेनानिग् लक्षणत्वेऽपि निषेधप्रवृत्तेः। पुग्विधानमपि "ह्मापयती"त्यादौ यङोपार्थम्। ओकाररूपगुणार्थं च चरितार्थमित्याशयः ॥

पुकीति। (कै)

लाघवात्तत्पुरुषे निर्णीते "निषादस्थपति" न्यायेन नियमार्थत्वन्न दोषावहमित्यर्थः। ननु पुगन्तग्रहणं दापयतीत्यादौ अनन्त्यस्यानिकोऽपि गुणार्थं स्यादिति कथं [३]नियमार्थत्वमिति चेन्न। गुणे उपधावृद्ध्या विशेषाभावात् ॥

---

१ ङ्यग्निचितेत्यादौ। ख ॥ २ भिन्नोभिन्नम्। क ॥
३ नियमार्थमिति चेन्न। क ॥

प्रकृतस्यैवेति। (कै)

अनन्तरस्यैवेत्यर्थः॥ न"च्वनन्तरस्ये"ति न्यायविरुद्धोऽयं नियम इत्यत आह

अनन्तरस्येति। (कै)

लक्ष्यानुसारस्यानाश्रयणे बीजं बोध्यम्। अभ्युपेत्यवादः क्लेशेनाङ्गीकार इत्याशयः॥

पिच्चेति। (कै)

[1]उगवादिभ्यो यत्। (पा)

उवर्णान्तस्याङ्गस्येकोगुण इति व्याख्यानमभिप्रेत्याह दोषोपन्यासः। परन्तु[2] "स्वौश्रुत इत्यत्रापि प्राप्नोतीति" भाष्याननुगुणा सा व्याख्येति चिन्त्योऽयं कैयट इत्याशयः। क्वचित्तु कैयटपुस्तके"पिच्च्य" इति न दृश्यत एव॥

तच्छेष (भा)

इति शब्दोऽसम्भवदुक्तिकलङ्कस्तोऽपीत्याह

परस्परेति। (कै)

विशेषणविशेष्यभावमात्रेण शेषशेषिव्यवहारो न क्वापि दृष्टचर इति भावः॥ अत एवाग्रे एतत्पक्षोक्तदूषणोद्धारेऽपि नायं तच्छेष इत्युक्तिः सङ्गच्छते॥

---

१ अ ५। पा १। सू २॥ २ उक्तं भाष्ये॥

सन्निपात इति । (कै)

जायमानोऽपि सन्निपातः सावकाशत्वेन विप्रतिषेधोपयोग्येव न तच्छेषलोपयोगी । अत एव नापवादत्वमप्युक्तदोषाच्चेति भावः ॥

असम्बद्धमनयेति (भा)

भाष्यस्य शेषशेषिभावानापन्नमुत्सर्गापवादभावानापन्नं चेत्यर्थः ॥

नियमादिति । (भा)

अलोऽन्त्यपरिभाषायाः पूर्वाचार्यसंज्ञानियम इति ॥

तेनैव तस्यायुक्त इति । (भा)

स्वाङ्गेन स्वस्येत्यर्थः ॥ शेषशेषिणोरभेदमत्वा तेनैवेत्याद्युक्तम् ॥ नन्वङ्गस्येति स्थानषष्ठीदर्शना "त्सार्वधातुके" त्यादा[1]वलोऽन्त्यपरिभाषाप्रवृत्त्या कथमिक्परिभाषायास्त्रयनमित्यवकाशोऽत आह

[2]अलोऽन्त्येति । (पा)

अङ्गेनैको विशेषणेन पुगन्तेत्यादिनियमेन च तत्प्रयोजनसिद्धेरिति भावः ॥

अचाहुरिति । (कै)

अचा विशेषिताङ्गेनैको विशेषणसम्भवात् । प्रापयति गावाविन्यादि लेष न जानातीति भावः ॥

---

१ इत्यादावप्यलोऽन्त्यपरिभाषाप्रवृत्त्या । क । ख । ङ ॥

२ अ १ । पा १ । सू ५२ ॥

दृष्टेति। (कै)

दृष्टसिद्धिफलकत्वमेव हि तस्य युक्तत्वमितिभावः॥

न तु कार्येति। (कै)

द्वयोरप्येकदेशस्थत्वेन परत्वासम्भवादितिभावः॥ वस्तुतः कार्यकालपक्षेऽपि पाणिन्युच्चारणरूपपाठकृतपरत्वमस्त्येव। अन्यथैकत्र प्रयोगरूपदेशे [1]सर्वेषां मेलनेन परत्वस्योच्छेद एव स्यात्। प्रयोगसाधनफलकान्येव शास्त्राणि। नचैवं कार्यकालपक्षमादाय चिपाद्यामेषां प्रवृत्तिः। यथोद्देशेतु पूर्वाणीतानि प्रति चिपाद्या असिद्धत्वेनाप्रवृत्तिरेव स्यादिति भाष्याद्युक्तं विरुध्येतेति वाच्यम्। परिभाषायाः सिद्धत्वेन तत्पक्षेऽसिद्धेनापि कार्येण स्वार्थं तदाकर्षणसम्भवादित्यष्टमे उपपादयिष्यमाणत्वात्। ध्वनितं चेदं

[2]तस्मिन्निति निर्दिष्टे (पा)

इत्यत्र भाष्यकैयटयोरिति चिन्त्यमेतत्॥

ननु

द्विकार्ययोग (भा)

इत्यस्य द्वाभ्यां कार्याभ्यामन्यस्य योग इत्यर्थः। उत द्वयोः परस्परेण योग इत्यर्थः। उभयथापि [3]चिपदतत्पुरुषो दुर्लभः। कर्मधारयपूर्वपदकोऽपि न

---

१ सर्वेषां मिलनेन। क। इ॥ २ अ १। पा १। सू ६६॥
३ चिपदस्तत्पुरुषः। ख॥

[1]दिक् संख्ये (पा)

इति नियमेन तस्य दुर्लभत्वादत आह

द्वाभ्यामित्यादि । (कै)

अत्रापि पक्षे विप्रतिषेधशब्देन सामानाधिकरण्यानुपपत्तेराह

विप्रतिषेधेति ॥ (कै)

द्विकार्य्ययोगेऽप्यसम्भवसत्त्वादाह

केवलोऽपीति ॥ (कै)

ननु आ ए इति ए आ इति वादेशसम्भवोऽस्त्येवेत्यत आह

न चेति ॥ (कै)

द्वयोरिति । (कै)

कार्ययोरित्यर्थः ॥ अनन्तरे यञि दीर्घः साधुरनन्तरे झलि एवं [2]साध्वित्यर्थ इति भावः ॥

[3]आङ्गुण (पा)

इत्यादौ द्वयोः स्थानिनोरेकादेशस्य सम्भवादाह

[4]मिदेरिति ॥ (पा)

न चास्ति सम्भवो युगपदिति । (कै)

युगपदाख्यार्थद्वयबोधाभावादिति भावः ॥ ननूक्रीत्याप्रयोजनाभावाद्

---

१ दिक्संख्ये संज्ञायाम् । अ २ । पा १ । सू ५० ॥
२ साधुरित्यर्थः । क । ख । इ ॥ ३ अ ६ । पा १ । सू ८७ ॥
४ अ ७ । पा ३ । सू ८२ ॥

[1]अलोऽन्त्यस्य (पा)

अप्रवृत्तौ अचापि नियमः प्राप्नोतीत्यसङ्गतमत आह

यदीदमिति। (कै)

एतद्भावे "सम्भवति सामानाधिकरण्ये वैयधिकरण्यस्यान्याय्यत्वात्" सर्वचाङ्गस्येति स्थान षष्ठ्येव स्थते त्वस्मिन्नवयवषष्ठी सेति भावः॥

अथापि कथञ्चिदिति (भा)

भाष्यस्योक्त एवाशयः॥

क्रोष्ट्रीयमतम्। (कै)

विप्रतिषेधः॥ असंबद्धपरिभाषापक्षस्य तदुपजीव्यः। तत्र विप्रतिषेधरहितोऽन्त्यस्त्वयुक्त एव। क्व सन्निपातः क्वान्यतरत्यागः स च कस्येत्यत्र विनिगमकाभावेन [2]सर्वेष्टासिद्धेस्तस्माद्वयमप्येकपक्षभूतमेव बोध्यम्॥

प्रदेशार्थत्वादिति। (कै)

परस्परेण सम्बन्धाभावादित्यन्तेन तच्छेषत्वासम्भव उक्तः। पदोपस्थितिपक्षे च विधेयसमर्पकत्वेन गृहीतगुणादिपदश्रुतिरस्या लिङ्गमित्येषान्तरङ्गा। तत्त्वेन ग्रहस्य प्रथमाया विधेयविभक्तित्वेन तदन्तत्वेन पदज्ञानकाल[3] एव। तदुक्तं भाष्ये

---

१ अ १। पा १। सू ५२॥ २ सर्वेष्टाऽसिद्धेः। ख॥
३ पदज्ञानकाले एव। ख॥

गुणो भवतीति यचे- (भा)

त्यादि। नियमस्तु स्थानषष्ठीलिङ्गक इत्यवान्तरवाक्यार्थबोधोत्तरकालिकत्वेन बहिरङ्गः। एवं च मिदादावुपस्थितेक्परिभाषायाः सामानाधिकरण्यासम्भवाद्वैयधिकरण्यान्वये वृत्ते निमित्ताभावादेव

अलोऽन्त्यस्ये- (पा)

त्यस्यानुपस्थितिः।

[1]सार्वधातुकार्द्धधातुकयोरि- (पा)

त्यादौ सामानाधिकरण्यान्वये

अलोऽन्त्यस्ये- (पा)

त्यनेनान्त्यस्यादेशव्यवस्था। एतेनैकस्या अप्रवृत्तौ अपरापि न प्रवर्त्तेतेत्यपास्तम्।

पर्यालोचनयेति। (कै)

प्रदेशे सति सम्भवे परिभाषाद्वयैकवाक्यतया वाक्यार्थः। अन्यथात्विक्परिभाषागर्भ एव। अस्या अन्तरङ्गत्वादित्यर्थः॥ भाष्ये

[2]वृद्धिर्भवतीत्यादि। (भा)

[3]इतिशब्दो यचेत्यर्थकः॥

---

१ अ ७। पा ३। सू ८४॥
२ भाष्ये वृद्धिर्भवतीत्यादि। क॥
३ इति शब्दो यचेत्यर्थः। क॥

इक इत्येतदिति। (भा)

[1]इक इति सूत्रे इक इति षष्ठ्यन्तानुकरणमित्यर्थः। अनुवृत्तस्य स्वरूपपरत्वेन गुणग्रब्दो भवतीत्याद्यर्थः स्यात्। अतः पुनरत्र गुणवृद्धिग्रहणम्। अनुवृत्तस्यार्थपरत्वं तु न। ग्रब्दाधिकारापत्तेः। उभाभ्यां च गुणग्रब्दवान् गुणो यत्रेत्यादिरर्थस्तदुक्तमिति

यत्रेत्यादि॥ (भा)

गुणपदं यत्र वर्त्तते इत्याद्यर्थस्तु न।

[2]अतो गुण (पा)

इत्यादावप्यापत्तेः। "भवति" क्रियाया अन्तरङ्गत्वाच्च। अस्मादेव गुणवृद्धिग्रहणाच्च विधीयमान इत्यस्य तदर्थकस्य भवतीत्यस्य वाऽध्याहार इति बोध्यम्। एतन्मूलकमेवानुवादे [3]परिभाषानोपतिष्ठते इति। अत एव तदेतद्विषयमेव

[4]अचश्चे- (पा)

त्येतद्विषयमेव च।

[5]अचो ञ्णिती- (पा)

त्यादौ तु वाक्यार्थबोधकाले श्रौताच्पदेनैवाकाङ्क्षाग्रान्तौ लिङ्गोपस्थितस्य दुर्बलतया नान्वयः इति दिक्॥

---

१ सूत्रे इक इति। क॥ "इक इति" इति कचिच्चिह्नितपुस्तके नास्ति॥
२ अ १। पा १। सू ९७॥
३ विधौ परिभाषोपतिष्ठते नानुवादे। १०२॥ परिभाषेन्दुशेखरे स्पष्टम्॥
४ अ १। पा २। सू २८॥ ५ अ ७। पा २। सू ११५॥

पुकि अन्त इति । (भा)

सुप्तुपेति समासः । भिनत्तीत्यत्र गुणापादनं-

[1]क्ङिती- (पा)

त्यस्य निमित्तसप्तमीत्वात् । इकः

सार्वधातुकार्द्धधातुकयो- (पा)

रितिविशेषणमिति तु न युक्तम् । तस्याङ्गांशे उत्पित्ताङ्गत्वात् । भाष्ये

यणादिपरं गुण इति । (भा)

यणादिपरं लुप्यतेऽवयविष्टस्य गुण इत्यर्थेन चिप्रादेः सर्वादेशो गुणः सिद्धः स्थूलादौ तु

[2]श्नोर्गुण (पा)

इत्येव सिद्धमिति भावः ॥ ननु पूर्वस्येत्युक्तावपि यणपेक्षादेः परमित्यर्थे पूर्वस्य गुण इत्यनेनापि तत एव पूर्वस्य गुणापत्तौ स्थूलादिषु थकारादेर्गुणः स्याद् यणादिर्यस्य तद्रूपं परं लुप्यते ततः पूर्वस्य च गुण इत्यर्थे चिप्रचुद्र्योरन्त्यस्य व्यञ्जनस्य गुणः स्यादत आह

अच चेति ॥ (कै)

अनित्यत्वादिति । (कै)

आसन्नित्यत्र लोपनिवृत्त्यर्थात्

---

१ क्ङिति च । अ १ । पा १ । सू ५ ॥

२ अ ६ । पा ४ । सू १४६ ॥

[1]असोरल्लोप (पा)

इति तपरकरणादित्यर्थः। तथा हि अस् अन्तीति स्थिते परत्वादल्लोपे तस्यासिद्धत्वात्पुनः प्रसङ्गेनाटि विकारान्यानुपूर्व्यैक्याभावेन "लक्ष्ये लक्षणस्ये"ति न्यायाप्राप्तौ प्राप्तलोपवारणार्थन्तपरत्वमाटोऽसिद्धत्वे व्यर्थं सत्तदनित्यत्वे ज्ञापकम्। न चाटोऽप्यनापत्तिः। तत्रानित्यत्वे मानाभावात्॥

तस्मादेव चेति। (कै)

पूर्वत्वस्यावध्याकाङ्क्षायां परत्वेऽवधित्वेन क्लृप्तत्वादुपस्थितत्वाच्च तस्यैवावधित्वमिति भावः। तद्ग्रनयन्व्याचष्टे

पञ्चमीसमास इति। (कै)

सुप्सुपेत्यनेन। अवयवभूते यणादीत्यत्र समुदिते चेत्यर्थः॥ न चैवं ह्रस्वग्रब्दे[2] रस्य ग्रब्दस्यापि लोपापत्तिः। स्यूलादिसाहचर्य्येणोपान्त्ययणादेः परस्यैव लोपादित्याहुः॥

पक्षाश्रयणाच्चेति। (कै)

परिभाषाणामनियमे नियमकारित्वाच्चेत्यपि बोध्यम्। एवं "ह्मापयती" त्यादौ "[4]युगन्ते"ति गुणे उपधा वृद्धिरिति न दोषः॥

---

१ अ ६। पा ४। सू १११॥
२ रस्वग्रब्दस्यापि। इ॥
३ नियमकारिणीत्वाच्च। क। इ॥
४ अ ७। पा ३। सू ८६॥

[1]क्नुसनोरिति । (कै)

एतत्

क्ङिति च- (पा)

ति सूत्रे उपपादयिष्यते ॥ भाष्ये शङ्कते

अथ वृद्धिग्रहणमिति । (भा)

न क्वचित्स्थानी निर्दिश्यते (भा)

इत्युक्त्वा सर्वत्रैव न निर्दिश्यते इति प्रतीयते क्वचिदादिपद[2]वर्त्ति-नञः क्वचिदादिपदबोध्याधिकरणादौ सर्वत्राभावप्रतीतेर्व्युत्पत्ति-सिद्धत्वात् तच्चायुक्तमत आह

क्वचिदिति ॥ (कै)

भाष्ये सिद्धान्त्याह

वृद्धिग्रहणमुत्तरार्थमिति ॥ (भा)

पूर्वपक्ष्याह

कश्चेत्यादि ॥ (भा)

अविशेषेणोच्यते सा

क्ङितीति ॥ (भा)

प्रत्ययविशेषानाश्रयणमत्राविशेषः ॥ उत्तरस्याविशेषेणेत्यस्य स्था-निविशेषानुच्चारणेनेत्यर्थस्तदाह

---

१ क्नुसवोरिति । क ॥

२ क्वचिदादिपदप्राग्वर्त्तिनञः ॥ ख ॥

तच्च हि सूत्रे इति ॥ (कै)

अडागमात्पूर्वमिति । (कै)

लादेशेषु कृतेष्वडिति

पचे इदम् ॥

अटि कृते इति। (कै)

विकारान्यानुपूर्व्या भेदेन लक्ष्यभेदाच्चिन्त्यमिदम् ॥

परत्वाद् (कै)

इत्यपि चिन्त्यम् । द्वयोर्यौगपद्यासम्भवात् ॥

एवं तर्हीति । (कै)

लावस्थायामडिति (भा)

पचे इति भावः ॥ भाष्ये

[1]अनन्त्यविकारे इति । (भा)

तथापि सिध्यतीत्यभिमानः ॥ सिद्धान्ते त्वन्यार्थमिग्ग्रहणे कृते तेनैवाटो व्यावृत्तिसिद्धौ सा नैतदर्थेति

[2]ष्यङः (पा)

इति सूत्रे वक्ष्यत इति न विरोधः ॥

तस्मान्मृजेरिति[3] । (भा)

---

१ अनन्त्यविकारेऽन्त्यसदेशस्य कार्यं भवतीति । भा ॥

२ ष्यङः सम्प्रसारणं पुत्रपत्योस्तत्पुरुषे । अ ६ । पा १ । आ १३ ॥

३ मृजेर्वृद्धिः । अ ७ । पा २ । सू ११४ ॥

निषेधस्य सिद्धये योगविभागमकृत्वा[1] स्थानिसमर्पणायास्या एवोपस्थितिरङ्गीकार्येति भावः ॥

संक्रम इति । (भा)

गुणवृद्धि प्रतिषेधविषयक्ङितः प्राचां संज्ञा ॥ "अचि" इत्येववचनम् ।

अजादाविति (भा)

तु तदादिपरिभाषालब्धार्थानुवादः ॥ अत एवाग्रे वक्ष्यति

ततोऽचि क्ङितीति ॥ (भा)

एवं च मम्रुजे यूयं मम्रुजेत्यादौ विकल्पो भवत्येव । एतेनादिग्रहणसामर्थ्यान्मुख्याजादावेव प्रवृत्तिस्तेन पूर्वोदाहृतेषु न वृद्धिरिति हरदत्तोक्तमपास्तम् ॥ "[2]तुन्दपरिमृज" इत्यत्र यदि वृद्ध्यभाव दृष्टः तर्हि व्यवस्थितविभाषया नेति बोध्यम् ॥

अजादावेवेति । (भा)

विपरीतनियमस्तु न । दृष्टानुरोधात् । सिचि वृद्धौ स्थानिविशेषानाश्रयणरूपोऽविशेषः ॥ उत्तरार्थत्वे खण्ड्यते सिद्धान्त्याह

दृहार्थमेवेति । (भा)

तत्खण्ड्यति पूर्वपक्षी

---

१ स्थानिसमर्थनाय । ख ॥

२ तुन्दशोकयोः परिमृजापनुदोः (अ ३ । पा २ । सू ५) इति सूत्रस्य दृष्टान्तः ॥

कस्य पुनरित्यादि ॥ (भा)

पूर्वविप्रतिषेधेति । (कै)

[1]ण्यक्षोपावियङ् । (भा)

इत्यादिः ।

चिकीर्षक इति । (कै)

अन्यथा ह्यच परत्वाद्वृद्धौ युकि चिकीर्षायक इति स्यात् ॥

परत्वादचेति । (कै)

अपवादत्वादित्यर्थः । परशब्द उत्कृष्टवाची ॥ भाष्ये

नैव सन्ध्यक्षरमिति । (भा)

वृद्धियोग्यमिति शेषः ॥ उपदेशे आत्त्वविधानादिति भावः ॥

अन्त्यमिति । (भा)

अङ्गस्य वृद्धिरित्यर्थोऽलोऽन्त्यपरिभाषाप्रवृत्तेरिति भावः ॥

ढलोपस्यासिद्धत्वादिति । (कै)

पूर्वं हलन्तलक्षणाया[2]वृद्धेर्जातत्वेनेदानीं

[3]सिचि वृद्धिः परस्मै[4] (पा)

इत्यस्य प्राप्त्या "लक्ष्ये लक्षणस्ये"त्यस्याप्रवृत्तिरिति भावः ।

---

१ अतो लोपः । अ ६ । पा ४ । सू ४८ । एतत् सूत्रस्यवार्त्तिकम् ॥

२ हलन्तलक्षणावृद्धेः । क ॥

३ अ ७ । पा २ । सू १ ॥

४ सिचि वृद्धिरित्यस्य । क ॥ ख । ङ ॥

धातुग्रहणमिति । (कै)

सिचा तदाक्षेपे सिद्ध इति भावः । एवं च कथ्यादिभ्य आचारक्विपि अकवायीत् इत्यादौ वृद्धिर्नेति[1] लभ्यते । माधवस्तु वृद्धिं मनुते ।

बहुलं छन्दसी- (पा)

त्यतो बहुलग्रहणानुवृत्त्या [2]सन्ध्यक्षरान्तनामधातोर्वृद्धिर्नान्यत्र भवत्येवेति तदाशयः ॥ तेन सेनयशब्दादिभ्य आचारक्विपि न वृद्धिरित्यलम् । वस्तुतस्तु

[3]नैव सन्ध्यक्षरमिति (भा)

एव गर्भैतद्भाष्यप्रामाण्येन [4]सन्ध्यक्षरान्तेभ्यः आचारक्विवेव नेत्याहुः ॥

हलन्तलक्षणावृद्धिर्बाधिकेति (भा)

भाष्ये । दृग्ग्रहणाभावे "येन नाप्राप्तिन्यायेनेति" भावः ॥

इत्याहेति । (कै)

इत्याशङ्कायामाहेत्यर्थः ॥

नैकचेति । (कै)

बाधसामान्यचिन्तेयम् ॥

---

१ वृद्धिर्न लभ्यते । क ॥
२ नामधातौ वृद्धिर्नान्यत्र । ख ॥
३ अत्रैवोक्तं भाष्ये ॥
४ सन्ध्यक्षरान्ते आचारक्विवेव । ख ॥

[1]नेटौ- (पा)

त्यच

[2]हलन्तस्य (पा)

इत्यनुवर्त्त्य हलन्तस्य या वृद्धिः प्राप्ता सा सर्वापि नेत्यर्थः। तेनालावीदित्यादौ न दोषः इति बोध्यम्॥ बाधविशेषचिन्तायामाह भाष्ये

अथवेति। (भा)

तद्व्याचष्टे

अपिशब्दादिति॥ (कै)

स्वप्रतिषेध्यहलन्तलक्षणवृद्धिप्रतिषेधद्वारा "भ्रष्टावसरन्यायेन" सिचि वृद्धेरप्यभावः प्रतिपाद्यते इत्यर्थः। तद्ध्वनयन्नाह भाष्ये

अस्ति पुनः क्वचिदित्यादि॥ (भा)

ननु तत्र प्रकृतिभावेन साचादेवोत्सर्गापवाद्योर्निवृत्तिर्न त्वपवादेन[3] बाधादुत्सर्गस्येत्यत आह

नान्त इति॥ (कै)

भाष्ये

न भवन्तीति। (भा)

भ्रष्टावसरन्यायेनेति भावः॥

---

१ अ ७। पा २। सू ४॥

२ वदव्रजहलन्तस्याचः। अ ७। पा २। सू ३। इत्यस्मात्॥

३ नत्वपवादे बाधादुत्सर्गस्य। क॥

पूर्वसवर्णदीर्घवद्वृद्धेरपीति । (कै)

अवर्णादिचि यद्यत्प्राप्तं तन्नेति बाधसामान्यचिन्तारूपाद्यपेक्षेणेयं शङ्का ज्ञापकाद्बाधविशेष चिन्तैवाश्रीयत इत्युत्तरम् ॥ पूर्वसवर्णदीर्घे निषिद्धे वृद्धेरपीति पाठे भ्रष्टावसरन्यायानित्यत्वेन क्वचिदपवादनिवृत्तावपि तद्विषये उत्सर्गप्रवृत्तिर्ज्ञाप्यते इति भावः ॥ परेतु

अथवेति (भा)

भाष्यं पूर्वपक्ष्युक्तित्वात्प्रौढ्या । "भ्रष्टावसरन्यायस्तु" नास्त्येवोक्तनिर्देशात् । अत एव

[1]नान्तःपादमिति (भा)

सूत्रे एङोऽतीत्यनुवर्त्त्य एङोऽति यद्यत्प्राप्नोति तस्य निषेध इत्यर्थमाश्रित्य सर्वनिषेधकत्वं तस्योक्तमिति वदन्ति ॥ वृद्ध्यर्थत्वे पूर्वपक्षिणा प्रौढ्यापि खण्डिते सिद्धान्ती तदभ्युपेत्याह

उत्तरार्थमेवेति ॥ (भा)

नूधूधातू कुटादी ॥ भाष्ये

अनन्त्यत्वादिति । (भा)

अचोऽनन्त्यत्वादित्यर्थः ॥ नन्विक्परिभाषाभावेऽन्त्यात्प्राक्तस्य सा प्राप्नोतीति अनन्त्यत्वादित्यसङ्गतमिति चेन्न । हलन्तेषु हलन्तलक्षणया बाधेनास्या वृद्धेरजन्त एव व्यवस्थितेरित्याशयात् ॥ सिद्धान्त्याह

---

१ प्रकृत्यान्तः पादमव्यपरे । अ ६ । पा १ । सू ११५ ॥

यदि तर्हीति । (भा)

अत्र यदीत्यनेनापवादत्वात्तद्विषये ऽन्तरङ्गप्रवृत्तिरेव वक्तुमशक्येति ध्वनितम् । इत उत्तरग्रन्थस्तु सिद्धान्त्याग्रयानभिज्ञपूर्वपक्ष्येकदेशिसिद्धान्त्येकदेशिनोरिति बोध्यम् ॥

[1]लुप्तनिर्दिष्ट (भा)

इत्यत्र पूर्वनिर्दिष्टः पश्चाल्लुप्त इत्यर्थे [2]मयूरव्यंसकादित्वात्समासः । न च गुणे कृते [3]"वार्णादाङ्गमिति" न्यायेनावं बाधित्वा वृद्धौ आवादेशे अलावीदित्यादेः सिद्धौ वप्रश्लेषो व्यर्थः इति वाच्यम् ।

[4]सिचि वृद्धिरि- (पा)

त्यस्यापवादत्वाज्ञानेनैव एतत्परिभाषाऽज्ञानेनैवास्य प्रवृत्तेरदोषात् । न च वकारप्रश्लेषे [5]अग्रवीदग्रावौद् इति ग्रब्धातोर्नित्यवृद्ध्यापत्तिः । अस्या एकदेश्युक्तित्वेन तदज्ञानेनैवास्य भाष्यस्य प्रवृत्तेः । जिरिचिर्य्यादिज्ञानवद् इत्याहुः ॥ एतद्भाष्यग्राम्याण्णात्स धातुः पवर्गौयान्तो ववयोः समानश्रुतित्वाल्लोके दन्त्योष्ठ्यश्रुतिरित्यन्ये । अवेराटि वृद्धवृद्धोरविशेष इति आण्निवृत्तये भाष्ये माङ्प्रयुक्तः । एकादेशे पुनरप्यविशेषस्तदवस्थ इति भवानित्युक्तं मवौ तु प्रयोजनान्तरासत्त्वेऽप्येकरूप्याय तत्प्रयोगः ।

---

१ लुप्तनिर्दिष्टो वकारः । भा ॥
२ मयूरव्यंसकादयश्च । अ २ । पा १ । सू ७२ ॥
३ न च गुणे वार्णादाङ्गमिति । क । ख । ङ ॥
४ अ ७ । पा २ । सू १ ॥
५ अग्रावीदिति नास्ति । ख ॥

[1]अविमय्योर्नेति (भा)

निषेधस्य [2]मध्येऽपवादन्यायेन

[3]अतो ल्रान्तस्य (पा)

इत्यस्यैव तेन

अतो[4]हलादेरिति (पा)

विकल्पो भवत्येवेति बोध्यम् ।

सिचि वृद्धिरिति (पा)

सूत्रं तु अचैषीद् इत्यादौ गुणे कृते चरितार्थमेतन्मते इति बोध्यम् ॥

[5]कृतेऽस्य चारितार्थ्येऽपि स्वप्राप्तिकाले प्राप्तस्य [6]येन नाप्राप्ति-न्यायेन बाध इत्येतदाह

न्यायादपीत्यादि । (कै)

बाधसामान्यचिन्तया च सकलान्तरङ्गबाध इति बोध्यम् । एवञ्च न ज्ञापकोपयोगो नापि ज्ञापकसम्भवो नापि प्रयोजनं

---

१ अविमय्योर्नेति वक्ष्यामि । भा ॥

२ मध्येऽपवादाः पूर्वान्विधीन् बाधन्ते नोत्तरान् । परिभा । ६१ ॥

३ अ ७ । पा २ । सू २ ॥

४ अतो हलादेर्लघोः । अ ७ । पा २ । सू ७ ॥

५ "कृतेऽस्य" इत्यारभ्य "वृद्धिविकल्प एवेति बोध्यम्" इत्यन्तं नास्ति । क । ख । ङ ॥

६ येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति। परिभा ।५८॥

वार्णपरिभाषयाऽचिरायौदित्यादौ गुणे कृतेऽयादेशात्पूर्वं वृद्धिप्राप्तेर्न वा वकारप्रश्लेषस्य पलं नाप्यविमय्योः प्रतिषेधस्येति ग्रब्धातौ वृद्धिविकल्प एवेति बोध्यम् ॥

[1]नैतदस्तिज्ञापकमिति। (भा)

भाष्ये

न्यकुटीदि- (भा)

त्यादावन्तरङ्गतया वृद्धिबाधकगुणस्य निषेधेऽपि भ्रष्टावसरन्यायेन न वृद्ध्यभावः। सिद्धान्ते न्यायाभावादिति भावः ॥

यत्तर्हि णिश्व्योरिति। (भा)

ननु णिश्विस्थानेऽविमवौ इति वदन्तं प्रति णिश्विप्रतिषेधस्य ज्ञापकत्वाभिधानमयुक्तमिति चेन्न। ज्ञापकत्वे संभवति [2]निमानासंभव इत्याग्रयात् ॥

यच्च करोतीति। (भा)

दृग्ग्रहणाभावेऽकोषीदित्यादौ व्यञ्जनस्य वृद्धिवारणाय बाध्यविशेषचिन्तापक्षे त्वया सिचि वृद्ध्यपवादहलन्तलक्षणाया निषेधे तेन न्यायेन[3] सिचिवृद्ध्यप्राप्तेः स्वीकारेण लङ्दीत्या ज्ञापकमेवेति भावः। एतेन सिच्यन्तरङ्गाभावेऽपि परत्वाद्गुणस्य वृद्धिबाधकतायां दुर्वारत्वेनाकोषीदित्यादौ लघुत्वाभावादेव वृद्ध्यभावेऽत इति[4] व्यर्थमेवे-

---

१ "भाष्ये" इति नास्ति। क। ख। इ ॥

२ मानासंभव इति। क। नयमत्वासंभव इति। ख ॥

३ विशेष इत्यधिकम्। क ॥

४ व्यर्थमेवेत्यन्तम्। क। ख ॥

त्यन्त्यं ज्ञापकमसंगतं [1]तथा णिश्योर्गुणे वार्णपरिभाषयाऽयादेशं बाधित्वा प्राप्तवृद्धेर्निषेधाय णिश्विग्रहणमप्यावश्यकमित्याद्यमप्यसंगतमित्यपास्तम्। एकदेश्युक्तित्वेनादोषात्। एतदेव ध्वनयन्

[2]यदि तर्हीति (भा)

सिद्धान्युक्तौ यद्यन्तर्भावसूचितम्[3] ॥

[4]एवं च न्यनुवीदित्यादौ उवङं बाधित्वा प्राप्ताया वृद्धेर्निषेधायेग्लक्षणा मिचि वृद्धिरास्थेयेत्युपसंहरति सिद्धान्ती

तस्मादिति (भा)

भाष्ये। दृग्लक्षणत्वेन निषेधाय अकोषोदित्यादावनिकौ गुणव्यावृत्तये चेति भावः। बाध्यसामान्यचिन्ता भ्रष्टावसरन्यायश्चैकदेश्युक्तिर्न तु सिद्धान्तः। अत एव

[5]न्यस्तारीदि- (भा)

त्युपक्रम्य

[6]हलन्तलक्षणायाश्च [7]नेटीति प्रतिषेध (भा)

दित्युक्तमित्यलम्।

---

१ तथापि। क ॥ २ अत्रैवोक्तं भाष्ये ॥
३ सिद्धान्युक्तौ यद्यन्तर्भावः सूचितः। क। सिद्धान्युक्तौ यद्यन्तर्भावः सूचितः। ख ॥
४ प्रागुक्त "कृतेऽस्य चारितार्थ्ये" इत्यारभ्य "वृद्धिविकल्प एवेति बोध्यम्" इत्यन्तमत्रास्ति। क। ख। इ ॥ ५ अत्रैवोक्तं भाष्ये ॥
६ अ ७। पा २। सू ३ ॥ ७ अ ७। पा २। सू ४ ॥

विधायकमिति। (कै)

[1]इको यणचौ- (पा)

त्यादि तु स्वविषयेऽस्य बाधकमिति न तदैयर्थ्यरूपो दोषः ॥

भाष्ये

इङ्निवृत्तिरि- (भा)

त्यस्य गुणवृद्धिरूपादेशेनेत्यादिः ॥

पुनर्वचनम् (भा)

[2]अदेङ्गुण[2] (पा)

इत्यादिरूपम् ॥

नियमाद्विधेरिति। (कै)

प्राप्तबाधानुवादरूपदोषापत्या परिसंख्यारूपो नियमो गुरुरिति भावः ॥

द्वितीयमिति। (कै)

केवलविधापकत्वेऽनुवृत्त्यैव सिद्धे इहत्यगुणवृद्धिग्रहणम् अनर्थकं स्यादिति भावः। यातीत्यादिनिर्देशेर्गुरोरपि नियमस्याश्रयणमित्यन्ये ॥

तुल्यन्यायेति। (कै)

[4]षष्ठीदर्शनरूपोन्यायः ॥

---

१ अ १। पा १। सू ७७ ॥

२ पुनर्वचनं मिदेर्गुण इत्यादिरूपम्। क। ख। ङ ॥

३ अ १। पा १। सू २ ॥ ४ षष्ठीनिर्देशरूपो न्यायः। क ॥

वाक्यभेदेनेति । (कै)

[1]ष्यङः संप्रसारणमि- (पा)

त्यादिनिर्वाहाय सामान्येन संज्ञाविधानार्थं वाक्यभेद आवश्यक इति भावः ॥

विषयार्थमि- (भा)

त्यस्य निमित्तनियमार्थमित्यर्थः ॥ [2]गुणादिविधावधिकारलब्धा षष्ठीत्याह

अङ्गस्येति ॥ (कै)

तच्च

[3]उरण्रपर (पा)

इत्यत्र षष्ठीत्यनुवर्त्य पूर्वोक्तार्थः सुलभः । एतयोरपि तच्चानुवृत्त्या षष्ठीतिसंबन्धेन तदर्थलाभः ॥ तच्चानुवर्त्तनं यदि लौकिकोऽधिकारस्तर्हि स आकाङ्क्षानिबन्धनः ॥ न च

[4]षष्ठी स्थाने (पा)

इत्यस्याकाङ्क्षेत्यत आह

स्वरितत्वादिति । (कै)

लक्ष्यानुरोधाच्चेत्यपि बोध्यम् ॥

---

१ अ ६ । पा १ । सू १३ ॥

२ गुणादिविधावपि अधिकारलब्धा । क । ख । ङ ॥

३ अ १ । पा १ । सू ५१ ॥

४ अ १ । पा १ । सू ४६ ॥

Nyayabindutīkā, (Text)	Rs. 0	10
Nyāya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1–6; Vol. II, Fasc. 1–3 @ /6/ each	3	6
Padumawati Fasc. 1 and 2 @ 2/	4	0
Pariçiṣta Parvan, (Text) Fasc. 1–5 @ /6/ each	1	14
Prithivirāj Rāsa, (Text) Part II. Fasc. 1–5 @ /6/ each	1	14
Ditto (English) Part II, Fasc. 1	0	12
Prākṛta Lakṣaṇam, (Text) Fasc. 1	1	8
Parāçara Smṛti, (Text) Vol. I, Fasc. 1–8; Vol. II, Fasc. 1–6; Vol. III, Fasc. 1–5 @ /6/ each	7	2
Parāçara, Institutes of (English)	0	12
*Sāma Vēda Saṁhitā, (Text) Vols. I, Fasc. 5–10; II, 1–6; III, 1–7; IV, 1–6; V, 1–8, @ /6/ each Fasc.	12	6
Sāṇkhya Sūtra Vṛtti, (Text) Fasc. 1–4 @ /6/ each	1	8
Ditto (English) Fasc. 1–3 @ /12/ each	2	4
Suçruta Saṁhitá, (Eng.) Fasc. 1 @ /12/	0	12
*Taittereya Saṁhitā, (Text) Fasc. 11–42 @ /6/ each	12	0
Tāṇḍya Brāhmaṇa, (Text) Fasc. 1–19 @ /6/ each	7	2
Tattva Cintāmaṇi, (Text) Vol. I, Fasc. 1–9. Vol. II. Fasc. 1–10, Vol. III, Fasc. 1–2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1–5, Part IV, Vol. II, Fasc. 1–7 @ /6/ each	12	12
Trikāṇḍa-Maṇḍanam, (Text) Fasc. 1 & 2 @ /6/	0	12
Tul'si Sat'sai, (Text) Fasc. 1–5 @ /6/ each	1	14
Uvāsagadasāo, (Text and English) Fasc. 1–6 @ /12/	4	8
Varāha Purāṇa, (Text) Fasc. 1–14 @ /6/ each	5	4
*Vāyu Purāṇa, (Text) Vol. I, Fasc. 2–6; Vol. II, Fasc. 1–7, @ /6/ each	4	8
Viṣṇu Smṛti, (Text) Fasc. 1–2 @ /6/ each	0	12
Vivādaratnākara, (Text) Fasc. 1–7 @ /6/ each	2	10
Vṛhannāradīya Purāṇa, (Text) Fasc. 1–6 @ /6/	2	4
Vṛhat Svayambhū Purāṇa, Fasc. 1 to V	1	14
Tibetan Series.		
Pag-Sam Ṭhi S'îñ, Fasc. 1–4 @ 1/ each	4	0
Sher-Phyin, Vol. I, Fasc. 1–5; Vol. II, Fasc. 1–3; Vol. III, Fasc. 1 to 4, @ 1/ each	12	0
Rtogs *brjod dpag hkhri* S'îñ (Tib. & Sans.) Vol. I, Fasc. 1–5; Vol. II. Fasc. 1–5 @ 1/ each	10	0
Arabic and Persian Series.		
'Ālamgīrnāmah, with Index, (Text) Fasc. 1–13 @ /6/ each... ...	4	14
Al-Muqaddasi (English) Vol. I. Fasc. 1	0	12
Āīn-i-Akbarī, (Text) Fasc. 1–22 @ 1/ each	22	0
Ditto (English) Vol. I, Fasc. 1–7, Vol. II, Fasc. 1–5, Vol. III Fasc. 1–5, @ 1/12/ each	29	12
Akbarnāmah, with Index, (Text) Fasc. 1–37 @ 1/ each	37	0
Ditto English Fasc, I–III @ 1/ each	3	0
Arabic Bibliography, by Dr. A. Sprenger	0	6
Bādshāhnāmah, with Index, (Text) Fasc. 1–19 @ /6/ each	7	2
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1–3 @ 1/ each	3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1–21 @ 1/ each	21	0
Farhang-i-Rashīdī, (Text) Fasc. 1–14 @ 1/ each	14	0
Fihrist-i-Ṭūsī, or, Ṭūsy's list of Shy'ah Books, (Text) Fasc. 1–4 @ /12/ each	3	0
Futūḥ-ush-Shām of Wāqidī, (Text) Fasc. 1–9 @ /6/ each	3	6
Ditto of Āzādī, (Text) Fasc. 1–4 @ /6/ each	1	8
Haft Āsmān, History of the Persian Masnawi, (Text) Fasc. 1 ...	0	12
History of the Caliphs, (English) Fasc. 1–6 @ /12/ each	4	8
Iqbālnāmah-i-Jahāngīri, (Text) Fasc. 1–3 @ /6/ each	1	2
Iṣābah, with Supplement, (Text) 51 Fasc. @ /12/ each	38	4
Maāṣir-ul-Umarā, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–9; Vol III, 1–10 Index to Vol. I Fasc. X & XI & Index to Vol. III, Fasc. XI & XII Index to Vol. II, Fasc. X, XI & XII @ /6/ each	13	2

* The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

Maghāzi of Wāqidī, (Text) Fasc. 1–5 @ /6/ each ...	Rs.	1	14
Muntakhabu-t-Tawārīkh, (Text) Fasc. 1–15 @ /6/ each ...	...	5	10
Muntakhabu-t-Tawārīkh, (English) Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–5 @ /12/ each	...	9	0
Muntakhabu-l-Lubāb, (Text) Fasc. 1–19 @ /6/ each ...	...	7	2
Ma'āṣir-i-'Ālamgīrī, (Text), Fasc. 1–6 @ /6/ each ...	...	2	4
Nukhbatu-l-Fikr, (Text) Fasc. 1	...	0	6
Niẓāmī's Khiradnāmah-i-Iskandari, (Text) Fasc. 1 and 2 @ /12/ each		1	8
Riyāẓu-s-Salātīn, (Text) Fasc. 1–5 @ /6/ each	...	1	14
*Suyūṭy's Itqān, on the Exegetic Sciences of the Koran, with Supplement, (Text) Fasc. 7–10 @ 1/ each	...	4	0
Ṭabaqāt-i-Nāṣirī, (Text) Fasc. 1–5 @ /6/ each	...	1	14
Ditto (English) Fasc. 1–14 @ /12/ each ...	...	10	8
Ditto Index	...	1	0
Tārīkh-i-Fīrūz Shāhi of Ẓiyāu-d-dīn Barni (Text) Fasc. 1–7 @ /6/ each...		2	10
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāj Aif, (Text) Fasc. 1–6 @ /6/ each...		2	4
Ten Ancient Arabic Poems, Fasc. 1 & 2 @ 1/8/ each ...	...	3	0
Wis o Rāmin. (Text) Fasc. 1–5 @ /6/ each	...	1	14
Ẓafarnāmah, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–8 @ /6/ each ..		6	6
Tuzuk-i-Jahāngirī, (Eng.) Fasc. 1	...	0	12

ASIATIC SOCIETY'S PUBLICATIONS.

1.	Asiatic Researches. Vol. VII, Vols. XIII and XVII, and Vols. XIX and XX @ 10/ each	...	50	0
2.	Proceedings of the Asiatic Society from 1865 to 1869 (incl.) @ /6/ per No.; and from 1870 to date @ /8/ per No.			
3.	Journal of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8) 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882, (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members.			
	N. B.—The figures enclosed in brackets give the number of Nos. in each Volume.			
4.	Centenary Review of the Researches of the Society from 1784–1883 ...		3	0
	General Cunningham's Archæological Survey Report for 1863–64 (Extra No., *J. A. S. B.*, 1864)		2	0
	Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., *J. A. S. B.*, 1868)		2	0
	Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J. A. S. B.*, 1875)		4	0
	Introduction to the Maithilī Language of North Bihār, by G. A. Grierson, Part II, Chrestomathy and Vocabulary (Extra No., *J. A. S. B.*, 1882)		4	0
5.	Anīs-ul-Musharraḥīn		3	0
6.	Catalogue of Fossil Vertebrata		3	0
7.	Catalogue of the Library of the Asiatic Society, Bengal, by W. A. Bion		3	8
8.	Iṣṭilāḥat-uṣ-Ṣūfiyah, edited by Dr. A. Sprenger, 8vo.		1	0
9.	Ināyah, a Commentary on the Hidāyah, Vols. II and IV, @ 16/ each...		32	0
10.	Jawāmlu-l-'ilm ir-riyāẓī, 168 pages with 17 plates, 4to. Part I ...		2	0
11.	Khizānatu-l-'ilm		4	0
12.	Mahābhārata, Vols. III and IV, @ 20/ each		40	0
13.	Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I–III, with 8 coloured Plates, 4to. (@ 6/ each		18	0
14.	Sharaya-ool-Islām		4	0
15.	Tibetan Dictionary, by Csoma de Körös		10	0
16.	Ditto Grammar „ „		8	0
17.	Kaçmīraçabdāmṛta, Parts I & II @ 1/8/		3	0

Notices of Sanskrit Manuscripts, Fasc. 1–26 @ 1/ each		26	0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ...		5	0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer, Asiatic Society," only.

1-2-99.

Books are supplied by V-P. P.

PK
531
A15
1899
v.1
pt.2



PLEASE DO NOT REMOVE
CARDS OR SLIPS FROM THIS POCKET

UNIVERSITY OF TORONTO LIBRARY

Pātañjalī
Mahabhasyapradīpodyotah